

TITLE

क्रियासंयोगविचारः

ಕ್ರಿಯಾಸಂಯೋಗವಿಚಾರಃ

श्री

श्रीहयग्रीवाय नमः ॥ मूलोक्तन्यायलक्षणस्यागे दूष्यतयास्वयं न्यायलक्षणमाह ॥ उचितेति यथाक्रमोक्तप्रतिज्ञादिपञ्चकान्तिव्याप्तिवा
चनाया आनुपूर्विकान्तं व्युत्क्रमोक्तप्रतिज्ञाविभिन्नार्थकं तेन क्रमोक्तप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां लाभः यद्यपि पूर्वपूर्ववर्ण
विशिष्टचरमवर्णत्वस्यैवानुपूर्वीत्वाद्घटत्वानुपूर्व्याः प्रतिज्ञानन्तरत्वमेव तत्पर्याया दृत्वाया दृत्वा वर्णसमूहे तेषां दव्यवहारस्ताद्दृशो ज्ञान
विषयताविशिष्टो तत्त्वानि वेशाद्दोषः प्रतिज्ञादिपञ्चकान्तिव्याप्तिवाचनाय पञ्चकपदं न चासाधकतानुमानस्थलीय न्याये व्याप्तिः तत्र हेत्वा
भासात्मकहेतोरसाधकतावाप्यत्वस्योभयवादिसम्मतत्वादुदाहरणाभावेन तादृशपञ्चकसमुदायत्वाभावादिति वाच्यं शिरोमणिमते
तन्मापित्रादिनः स्वकर्तव्यानिर्वाहार्थमुदाहरणस्यावश्यकत्वात [illegible] न्यथा सर्वत्रोपनयमात्रस्योद्भाव्यतापत्तेः अनुमितिमुपयुक्तव्याप्तिप
क्षधर्मतयोक्ततरवलाभसंभवात् यत्तु साध्यादिभेदेन न्या[illegible]भिन्नत्वात्तत्रोदाहरणं विनाप्रतिज्ञादि यत्तु एतत्सम्वेव न्यायत्ववाच्ये
मितित[illegible] तथासति कदाचित्समयबंधवशेन पञ्चावयवप्रयोगे[illegible]व्याप्तेः समुदायपदं तु तादृशपञ्चत्वस्य पर्याप्तिसंबंधेन यदधिकरण
तस्य क्रमिकत्वलाभार्थं तेन क्रमिकप्रतिज्ञाहेत्वादिमात्रे नातिव्याप्तिः तादवस्थ्यं क्रमेणापञ्चकत्वात् पञ्चपैः प्रतिज्ञादिपञ्चाभिधाने न्यायव्यव
हाराविरहात्तेषु पञ्चप्रयोज्यत्वम् अप्यो चित्तोत्रिवेशानियतया आसिद्धसाधनस्थलीयप्रतिज्ञादिसमुदाये न्यायत्वाभावात् साधपि
पाकालीनत्वं सोन्नायकविप्रतिपत्तिकालीनत्वं वा प्रतिज्ञाया विशेषणं वाच्यमित्यपि वदन्ति [illegible] न्यायावयवत्वघटितस्य प्रतिज्ञात्वादेर्न्या

यन्निरुक्तौ प्रवेशादन्योन्याश्रयत्वमत आह प्रतिज्ञात्वादिकमिति तथा च यादृशयादृशानुपूर्व्यवच्छिन्नैकधर्मकानां प्रतिज्ञादिव्यवहारस्तादृशा
तादृशानुपूर्वीकत्वमेवात्र प्रतिज्ञात्वं एवं हेतुत्वोदाहरणत्वादिकमपि उक्तक्रमेणैव निरुच्य न्यायलक्षणं प्रवेश्यं अन्यथा पर्वतादौ वह्न्याप्ति
प्रतिज्ञायाः पर्वतो वह्निमानु गिरिरग्निमानित्यादेर्नानाविधानुपूर्विकत्वेन तासामनेकविधानुपूर्व्याः प्रकृतन्यायलक्षणघटकत्वे अन्यवि
धानुपूर्विकप्रतिज्ञागर्भन्यायाव्याप्तिः पक्षधर्मिकसाध्यवत्ताबोधकवाक्यत्वेन कथंचित्तादृशस्यैकस्य प्रतिज्ञानामनुगमसंभवेपि यच्च
धूमवत्तद्वह्निमद्यथा महानसं यो यो धूमवान् स सो वह्निमान् यथा पाकप्रदेश इत्याद्यनेकविधानुपूर्विकस्य वह्निसाध्यकधूमोदाहर
णस्यैवोपादानेऽन्यगर्भन्यायाव्याप्तिः साधनधर्मिकसाध्यव्याप्यताबोधजनकवाक्यत्वेनोदाहरणानामनुगमेपि धूमो वह्निव्याप्य
इत्यादिवाक्यस्यापि तादृशत्वेन तद्गर्भत्वेपि प्रतिज्ञादिपंचके अतिप्रसंगादिति ध्येयं एवं पर्वतो वह्निसामग्रीमांस्तस्मादित्यादि क्वापि
कपंचकेपि नातिव्याप्तिः तस्मादित्यादिभावोकथकानां हि अवयवव्यवहारान्नविरहेण तादृशानुपूर्व्यवच्छिन्नं प्रकृतन्यायान्तर्गतहेत्वघटकत्वा
दिति वदन्ति नान्यो न्यौ इदमुपलक्षणं न्यायावयवघटितप्रतिज्ञात्वादेः प्रवेशोऽवच्छिन्नानुपूर्विकस्यापि वैयर्थ्यं एवं विभिन्नानु
पूर्विकस्य न्यायान्तर्गतत्वेन प्रतिज्ञात्वाद्यभावेनैव वारणादिति ननु न्यायघटितप्रतिज्ञात्वादेन प्रवेशे पर्वतो वह्निमानु धूमात् यो

योगसवान् संस्पर्शवान् नित्यादिविभिन्नसाध्यककमिकवाक्यपंचकेति व्याप्तिः नन तस्योचितानुपूर्विकत्वमेव नेति वाच्यं व्युत्क्रमो
क्तप्रतिज्ञादिसमुदायाभिन्नत्वरूपस्यैवौचित्यस्य तत्रापि सत्वात् अत आह साध्यापीति तथा च यादृशयादृशानुपूर्व्यवछिन्नेय
पक्षकयत्साध्यकप्रतिज्ञादिव्यवहारः तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते तत्पक्षकतत्साध्यकप्रतिज्ञादौ दितितदंतर्भा
वेवन्यायो निर्वाह्य इति नातिप्रसंगः। न चैवमपि पर्वतस्तेजस्वी वन्हेर्यो यो दहनवान् स स आलोकवान् तेजो व्याप्यहुताशन
वांश्चायं तस्मात्तेजस्वी इत्यादिसमुदाये तिव्याप्तिः एकविधानुपूर्विकसाध्यादिपदघटितप्रतिज्ञोदाहरणादिप्रवेशस्यासंभवात्।
तथाहि प्रयोजनेतन्नालिघटत्वादियादिस्थलीयन्यायोपनयस्यैतन्नभेदव्याप्यघटत्वानि साकांक्षस्या तथात्वादिति वाच्यं। तत्त
दानुपूर्विकभेदस्यौचित्यमध्ये अंतर्भावयितुं शक्यत्वात् न चैवं विभिन्नसाध्यकप्रतिज्ञादिसमुदायभेदमप्यौचित्यमध्ये प्रवेश्य सा
ध्यादिविशेषणं न देयमिति युक्तमुचितं तद्घटकघटप्रवेशानपेक्ष्य लाघवादेव तत्पक्षकतत्साध्यकप्रतिज्ञादेः प्रवेशितत्वादिति भा
वः ननु साध्यादिविशेषणमेतद्भावेव लक्षणे तु न नेनु वामदोष इत्यत आह व्याप्यादेरिति तथा च लक्ष्यस्याप्यननुगततदोषप्र
तिभावः यद्यपि तत्पक्षके तत्साध्यकप्रतिज्ञात्वादिकमत्र तद्धर्मिकतत्साध्यवत्त्वबोधस्वरूपयोग्यत्वादिकमेव वाच्यं अन्यथा सभा

क्षोभादिना कोधाजनके न्याये व्याप्त्यापत्तिः एवं च वह्निपर्वतादिकमेकविधमेव साध्यपक्षादिकमुपादायानेकेः निखिलन्यायेसं
भवादननुगम्मात् विधानमसंगतं लक्षणादिदृष्टा सर्वस्यैव वाक्यस्य सर्वबोधकत्वसंभवात् तथापि तादृशानुपूर्वीणामेवाविशेषितत्वा
दनिवेशानुबोधकतायाः नास्त्यतिः अत्र यद्यप्यानुपूर्व्याः क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसन्नतया हि तादृश्यानुपूर्व्यं वृ
त्ति न्यूनस्य तदीयचरमवर्णस्य प्रतिज्ञाद्यव्यवहितोत्तरत्वासंभवात् प्रतिज्ञादिपंचकस्य क्रमिकत्वं दुर्घटं तथापि तत्तच्चरमवर्णपूर्वपू
र्ववर्णविशिष्टत्वं तत्प्रथमवर्णत्वमपि तत्तदानुपूर्वी विशेषात्मकाभावादिसाधारणेनेदं यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षहेतुसा
ध्यकन्यायव्यवहारः कथकसंप्रदायसिद्धस्तादृशान्यतमानुपूर्वीमत्त्वं तत्पक्षहेतुसाध्यकन्यायत्वमित्यत्र तात्पर्यं [illegible] च यादृश
यादृशानुपूर्व्यवच्छिन्ने सामान्यतो न्यायव्यवहारः सांप्रदायिकस्तादृशान्यतमानुपूर्वीमत्त्वमेव न्यायसामान्यलक्षणमपि
साध्याविशेषाद्यनियंत्रितत्वं तु वक्ष्यतीति ध्येयम् मूले कल न्यायलक्षणस्य यावेवीजमाहुः तेनेति समाहितमित्यत्रान्वयः प्रतिज्ञानिगम
नयोरिति हेत्वर्थान्वितप्रतिज्ञार्थधर्मिकनिगमनार्थप्रकारकबोधः। संभवमेव धूमाद्वह्निमान् पर्वतस्तस्माद्वह्निमानित्याकारका
बोधे बाधकाभावात् दंडवान् दंडवान् नरः दंडवानित्यान्वयबोधे न तादृशविशेष्येऽपि विशेषणतया वह्निमत्त्वस्य तस्यान्वयेनाकां
क्षत्वाभावादत आह यदाह नयेति।। प्रातिपक्षस्तु तत्पंचानामितितथाच प्रतिज्ञादिजनकवाक्यतया स्वार्थविशिष्टज्ञानजनकत्व

तिमूलमसंगतमितिभावः एकविशेष्यानिषेधस्यविशेषणान्तरविधाननियतत्वादाह पञ्चेति यद्वा अवयवः स्वतन्त्रावयवेनार्थबोधक इ

तिप्राचांग्रंथः कथंसंगच्छते अतआह [illegible] वेति नन्वेवं प्रतिज्ञाहेतुनान्वयबोधिकैवग्रंथः स्यान्नसामान्यरूपेणात आह बोधेति

दितिउपनयस्थार्थपदस्यनिगमनेनुपपत्त्यापक्षेतयोनपि निराकांक्षतया पञ्चस्वनन्वये बोधस्य प्राचामसंभवादितिभावः यद्यपि धूमादि

न्हिमत्पर्वताभिन्नोयोधूमवान् धूमव्यापकवह्निमान् तदभिन्नोवह्निव्याप्यधूमवानयं तस्माद्वह्निमानिति क्रमेण पञ्चानामवयवानां संसृ

ष्टविशिष्टबोधजनकत्वं न्यायादिसाध्यकन्यायस्थले संभवति तथापि चैत्रः पचति पाके ज्ञापकत्वात् योयः चैत्रः पाके [illegible]वान् सपचतीत्यादि

न्यायस्थले काधितक्रमेण पाककर्तृत्वादिविशिष्टविशेष्यकान्वयबोधासंभवादाह न्यायो व्याप्तीति तात्पर्यं सवह्निमान् विशेष्यताकशाब्दबो

धंप्रति नामजन्योपस्थितिजन्यपदजन्याः वाक्यमुपस्थिते स्वीकृतात् अन्यथा पक्वान्नं चैत्रो गच्छतीत्यादौ नचैवपचाति चैत्रो गच्छतीत्यादेरपि पा

कत्वस वह्निमान्नचैत्रेगतत्वादन्वयबोधापत्तेरिति ध्येयं वीप्सितार्थविधेयकान्वयबोधेतिङ्क्स्थलएवास्य व्युत्पत्तेरुक्तत्वेपकृतस्यातिङः थ

त्वेपि नक्षतिः फलानुरोधात्कल्पनायाः वीप्सितपदसमभिव्याहारस्थले आख्यातेनकर्तृविलक्षणा अतः तथाबोधे बाधकाभाव इतिभा

व इत्यप्याहुः वक्ष्यतीत्येवयदाह नपञ्चस्वान्वयिस्थलेपि सहृदयेतादात्म्येन स्यादन्यत्राननुपपत्तेरेव तात्पर्यं बोध्यं [illegible] पञ्चावयवानामेकवाक्य

तान्यवहानेन ताज्ञिकानां कथंस्यादित्यत आह एकेति विशिष्टेति पदार्थानुमितिरूपैकार्थप्रतिपत्तिहेतुर्घटकतामात्रेण तात्पर्यं प्रतिज्ञादिपञ्चवाक्ये

विषयादिमूलस्य प्रतिज्ञादिभिन्नैकवाक्यतापन्नमहज्ज्ञानसहकारेण प्रत्येकस्वस्वार्थविशिष्टज्ञानं जन्यते तेन न्यायवाक्यार्थज्ञानरूपेण विशिष्टवैशि
ष्ट्यावगाहि प्रतिज्ञार्थहेत्वर्थस्योपनयार्थनिगमनार्थस्य च ज्ञानसमं महावाक्यार्थज्ञानं तदुपस्थापकत इत्यर्थः कथं नूपान्त्यसंगतिरतो मूले लोके लक्षणोदा
परमाह तादृशोपनयानन्तरेति अनुमितिचरमकारणोपनयानन्तरमित्यर्थः तादृशोपनयानन्तरविषयेत्यर्थः तत्तत्पदार्थसाध्यव्याप्तिपक्षधर्मतोपस्थापक
तयालिङ्गविषयकृत इत्यर्थः तेन शाब्दबोधनिष्ठस्यैव प्रयोजकत्वस्य मूलेऽभिधानान्नासंगतिः सर्वत्रोदाहरणस्योपनयानन्तरविषयो भूतपक्षोऽनुधापक
त्वादुपनयपर्यन्तानुसरणे उपनयस्य न व्याप्तौ तात्पर्यं उदाहरणादेव तल्लाभात् वह्निव्याप्येति प्रयोगस्तु कथकसम्प्रदायादिप्राप्तो प्रयोगो हरणोप
न्यासः तदितिमूले तादृशोपनयानन्तरप्रयोजकशाब्दधीजनकत्वमित्यर्थः तथाप्यव्याप्तिरेव लक्षणे दोष इति भावः तदानुकूल्यमात्रेणेतिपदा
मनोविषयपदार्थविषयकत्वमात्रेणेत्यर्थः तादृशोपनयानन्तरप्रयोजकत्वमितिपूर्वेणान्वयः इत्यादेरित्यादिपदेन न्यायसमानार्थकोऽपि सदृशवाक्योप
ग्रहः तथा च तादृशोपनयानन्तरप्रयोजकशाब्दज्ञानजनकत्वस्य इत्यादिकमित्यादिना प्रतिज्ञाद्येकैकातिव्याप्तेः परिग्रहः मूलोक्तावयवलक्षणस्याव्युक्तदोष
गमकतामाह स्वयमेलक्षणमाह न्यायेति इत्यादिग्रन्थसंगतमुदासीनस्य प्रतिज्ञासमानाकारस्य व्युदासाय न न्यायान्तर्गतत्वं प्रतिज्ञात्वादिकमनु
पादाय तावदन्यतमत्वमेवावयवत्वमुच्यते कृते समर्थितेनेति वाच्यं प्रतिज्ञादिपञ्चकस्य प्रत्येकं न्यायान्तर्गतत्वपक्षेऽपि गौरवापत्तेः प्रतिज्ञाद्येकदेशव्युदा
सायविशेष्यदलेन च प्रतिज्ञाद्यन्यतमत्वस्य प्रतिज्ञात्वादिस्वरूपतया तावन्मात्रस्यैव कर्म्म सम्भवादिति भेदानुमाने तावदन्यतमत्वस्य वैय्य

धर्मिमितिवाच्यं ॥ अन्यतमत्वस्यातिरिक्तत्वात् न्यायान्तर्गतत्वस्याविशेषप्यतोऽभिन्नधर्मिकतया वैयर्थ्यशंका न वक्तव्या च ननु न प्रतिज्ञादिनिष्ठानु
पूर्वीविशेषावच्छिन्नभेदस्य वान्यतमत्वेन निवेशान्निष्पन्नः अन्यथा वाक्याविकत्व तस्मात्प्रतिज्ञादिव्यक्तिभेदस्य प्रवेशे सत्यैतवैयर्थ्यापत्तेः उदासीनवाक्य
व्यक्तिभेदस्यान्यतमत्वाघटकतयैव तत्रातिव्याप्त्यसंभवात् तथा च धूमात्तेजस्वी पर्वतो वह्निमान् धूमादित्यादिस्थलीयस्य प्रतिज्ञाघटक धूमादि
पदेन तस्य तादृशान्यतमत्वात्तत्रातिव्याप्तिः प्रकृतपक्षतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नविषयतानिरूपितत्वा
ख्यविषयताशालिबोधकपञ्चान्यतमवाक्यत्वस्य प्रकृते निवेशेऽपि प्रतिज्ञाघटकावच्छिन्नभेदादेः केवलान्वयितया तदवच्छिन्नभेदाप्रसिद्धिः व्यासज्य
वृत्तिधर्मावच्छिन्नानुयोगिताकभेदाभावाच्च प्रतिज्ञात्वावच्छिन्नेतरत्वाप्रसिद्धिरतो लक्षणान्तरमाह प्रतिज्ञेति प्रतिज्ञाघटकपदेनेति व्याप्तिवान् पायस मु
तं [illegible] च स्वान्यप्रतिज्ञाविषयिता व्यापकविषयिताकत्वेन प्रतिज्ञं घटकं निरुच्यतन्यवृत्तिनिवेशनीयप्रतिज्ञाविषयतायाः अधितादिपायिता व्या
पकत्वादसंभवः स्यादतः स्वान्येति व्यापकविषयिताविशेषणाय व्याप्तिसर्वैपोपदानामेव प्रतिज्ञादिघटकत्वात्तदन्यत्वेन प्रतिज्ञादावस्ति तथापि प्रति
ज्ञात्वान्यपक्षधर्मावच्छिन्नविषयिता प्रतिज्ञाविषयित्वव्यापकं तद्धर्मातिरिक्तधर्मावच्छिन्नव्याप्यतानिर्विषयिताकत्वं वाच्यं ॥ एवं हेत्वाद्यघटकत्वं नि
वाच्यं प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिवारणायोपनयघटकेत्यादिनिवेशे प्रतिज्ञादेरपि स्वीयपदलक्ष्यघटकभागद्वयघटितत्वादसंभवो व्याप्तिवि
शिष्टता उपनयघटकेति न चैवमपि निगमने व्याप्तिः उपनयस्थाये पदस्य निगमनेऽनुप्रवेशपक्षे अयं तस्माद्वह्निमानित्येव निगमनस्योपनयघटा

केइंपदेन निगमनघटकवन्ह्यादिपदेन घटितत्वादिति वाच्यं अन्वयबोधार्थमेयपदस्यानुपन्नेऽपि तदतभावेऽपि निगमनत्वाभावात्। तस्माद्धि
मानिवेवनिगमनाकाशात् निगमनाघटकघटके सद्रूपनयघटके यत्तु निगमनघटके तदुभयाघटितत्वं वा लक्षणे प्रवेश्यं तथा चार्थपदस्योपनयघ
वानिवामेनेऽपि घटकत्वाददोषः नच प्रतिज्ञाघटकहेतुघटकोभयाघटकत्वादिना प्रवेशे प्रतिज्ञोपनयसमुदायेऽतिव्याप्तिः तस्य तादृशोभयाघटित
त्वादिति वाच्यं उदासीनवाक्यवारणाय वह्न्यपानुपजनीयेन न्यायान्तर्गतत्वे सति यत्नेनैव तादृशसमुदायस्यापि वारणात् न्यायविपर्ययिता व्यापका
पर्ययिताप्रतियोगिकत्वरूपस्य न्यायान्तर्गतत्वस्य प्रतिज्ञोपनयसमुदायेऽप्यसम्भवात् कोचित्तु प्रतिज्ञाहेतूदाहरणहेतुपदे प्रतिज्ञाघटकान्यपदं तेन
थान्यप्रतिज्ञाघटकघटके तद्घटकान्योभयाघटितत्वे सति सर्वलाभान्तो लक्षणार्थः प्रतिज्ञोपनयसमुदायस्य प्रतिज्ञाघटके न प्रतिज्ञाघटकान्यो
पनयघटके चाघटितत्वात् एवं हेतूदाहरणादयोऽपि उदाहरणादिपदे हेत्वादिघटकान्यपरं ज्ञातो हेतूपनयसमुदायादावतिव्याप्तिरित्याहुः
तच्चिन्त्यं कस्यचिदवयवलक्षणमाह ॥ प्रतिज्ञादीति [illegible] विपर्ययेतितन्मात्रविषयकेत्यर्थः तेन प्रतिज्ञाहेतुसमुदायस्य प्रतिज्ञार्थविषयक
ज्ञानजनकत्वेऽपि न तत्रातिव्याप्तिः वाक्यत्वं न्यायान्तर्गतवाक्यत्वं तेनोदासीनवाक्ये नातिव्याप्तिः अत्र तादृशज्ञान्यतमबोधजनकत्वं तत्तद्रूपयोग्य
त्वमेवेति वाच्यं अन्यथा सम्भाव्यशोध्यादिवाक्यबोधजनकेऽपि प्रतिज्ञादावव्याप्त्यापत्तेः तथा चानिज्ञमानुः प्रमेयो द्रव्यत्वादित्यादौ प्रतिज्ञोपादेशोऽपि [illegible]
प्रमेयद्रव्यत्वातिव्याप्तिः तस्यापि तादृशबोधस्वरूपयोग्यत्वादित्यस्वरसः केचिदित्यनेन सूचितः नन्वेकलक्षणावच्छिन्नलक्षणान्तरादूषकतया तस्यैवाति

मूलमसंगतमतआह। तथा चेति ॥ बाधकाभावे न जातित्वेन नास्ति प्रकारान्तरेणैव प्रतिज्ञाव्यवहारसंभवे तदन्यथानुपपत्त्या जातिकल्पनादि
त्यान्वयः बाधकमिति तादृशजातावित्यनुपपद्यते येनेति जातय इत्यग्रे न्वयः द्वित्वादितिन न्वयस्यनादिनाप्रत्येकावयवजज्ञानवृत्तीनामित्रिवृत्तजा
तीनामेवप्रामाणिकत्वात् जनज्ञाने सांकर्यसंभवात् पुनः द्वित्वाद्युपादानमनर्थकमितिवाच्यं। एकावयवेनैकबोधजननपक्षेपि सांकर्यार्थं तदुप
न्यासादितिभावः। ननु न्यायजन्ये द्वित्वादिजन्ये प्रत्येकजन्ये च शाब्दबोधे च किंधाएव नानाजातयो वाच्याः तत्कुतः सांकर्यमतआह तत्तत्वेति
सु तत्वाभिमतिप्रतिज्ञादिव्यवहारानुरोधे प्रत्येकजन्यबोधवृत्तिवैजात्यसत्वेपि द्वित्वादिजन्यबोधे तादृक्धर्मजातेः कल्पकाभावादितिभावः भिन्नमत
मोहकेचिदिति मूलस्थमन्यथापदव्याकुर्वन्ति यदि वेति कदाचिदिति सांकर्यसंपत्तये ननु नियामकाभावात् कुतः संकर इत्यतआह ॥ एवमिति ननु
सत्र नीयत नानाजातेषु न टीकानास्वर्जातियत भिन्नसंगतमतआह एकजातीयत्वेति तथा च सर्वमिव लक्षणमव्ययवोतेनेति व्याप्तमिति भावः
साकल्पपदस्यमरव्यार्थमाकांक्षा नवनसः मूलोक्तदोपत्त्व ध्यमसौचलक्षणपरिष्कृते साध्यवद्वादिवक्ष्यमाणार्थस्य च न ज्ञानाल्प भावमाह वाक्य
ध्यवृत्तितथाचेति अजनकोतेनहेत्वादेनव्यावधान नोदासीनवाक्यस्य व्यु- सः न च पर्वतो वह्निमान् इति प्रतिज्ञावाक्यान् वह्निमानस्तादात्म्येन
पर्वतप्रकारतान्तपक्षतासाध्यतावच्छेदकीभूतपर्वतत्ववह्नित्वावच्छिन्नविषयताशालिबोधजनकत्वं नानाधर्मयोर्भेदेनान्वयस्याव्युत्पन्नतया पर्वतो वह्नि
संयोगेन प्रकारतास्वभावादितिवाच्यं ॥ नानाधर्मयोर्भेदेनान्वयस्यापि प्राच्यैः स्वीकारात् तन्मते एवाभिकाङ्क्षितत्वात् क्वेदार्थकावि। भक्ति

नाभिव तदर्थक मतु बादिव्यवहारस्यापि नियामकत्वादेवाव्याप्तिप्रसंगस्यतैः। नित्यत्वादीतिभावः पक्षतावच्छेदकविशिष्टस्यैव प्रयोजनत्वा
त उदाहरणान्येति न च यत्र पर्वतावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्ततया तत्रोदाहरणपोतिव्याप्तिरितिवा
च्यं पक्षतावच्छेदकानिष्टाववोधकत्वावगाहितायाअपिविशेष्यविशेषणियत्वादितिभावः॥ साध्यतावच्छेदकेसत्त्वफलमाह॥ उपनयान्तेति
वह्निव्याप्यधूमवान्पर्वत इत्याद्युपनयान्तेत्यर्थः अत्र येन संबंधेन साध्यता तेन स्वसाध्यवैशिष्ट्यावगाहितं बोध्यं तेनाविषयतासंबंधेन ज्ञा
नसाध्यके समवायसंबंधेन ज्ञानहेतौ ज्ञानव्याप्यज्ञानवाञ्छायमित्युपनये नातिव्याप्तिः सोपाधौ वैपरीत्याच्च सन्यायप्रयोगाइतिभावः॥ त
योनुदाहरणोपनययोः सर्वत्रिदमापाततः प्रतिज्ञासहकारेणात्तेऽवयवस्यापि प्रकृतपक्षधर्मिकस्वार्थविशिष्टप्रकृतसाध्यवत्त्वबोधकत
या तत्रातिप्रसंगस्य दुर्वारितापत्तेः तद्वारणाय प्रकृतपक्षे प्रकृतसाध्यवत्तान्वयबोधतावच्छिन्नप्रति ज्ञानकावयवत्वमेवलक्षणं वाच्यं तथा च
पक्षसाध्ययोरेकत्र अप्रवेशे प्रतिज्ञामात्रे संभवापत्तिकतोद्वयनुपात्तमिथःवतद्व्याहि भूतिवाक्यस्येति प्रतिज्ञासमानार्थकस्येति शेषः
तस्याविकथिद्विपरीतार्थप्रयोजनत्वाद्बोधजनकत्वाभ्युपगमे तेनास्यापांसंभवादाह ।प्रकृतस्यापेति साध्यव्याप्यवत्तानुमितेरपि कथा
निरुद्देश्यत्वादुपनयातिव्याप्तिरतो व्याचष्टे प्रकृतेत्यर्थ इति वह्निसाध्यकेत्यादि न्यायावयवत्वे सति प्रकृतानुमितिन्यूनानतिरिक्तशाब्दधीज
जनकत्वेतौ वह्निव्याप्यधूमवत्साध्यक प्रतिज्ञालक्षणस्य वह्निसाध्यकोपनयेऽतिव्याप्तिः तस्यापि न्यायावयवत्वात् वह्निव्याप्यधूमवत्ता

ध्यकानुमितिसमानाकारशाब्दधीजनकत्वाच्च प्रकृतन्यायावयवत्वे सति अन्तिमपुन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ च
वह्निसाध्यकप्रतिज्ञालक्षणस्य तत्साध्यकोपनये इति व्याप्तिः तस्यापि प्रकृतन्यायावयवत्वाद्वह्निव्याप्यसाध्यकानुमितिसमानाका
रशाब्दधीजनकत्वाच्च प्रकृतद्वयभिन्नत्वमर्थः इदं तु वि॰ एतेन वह्निसाध्यकोपनयस्य व्यावृत्तये प्रकृतद्वयभिन्नत्वे सगते साध्यादिभेदेन
प्रतिज्ञाया भिन्नतया वह्निसाध्यकप्रतिज्ञालक्षणे याकोपि न्यायावयवत्वे सति वह्निसाध्यकानुमित्यन्यूनानतिरिक्तविषयकबोध
जनकत्वमात्रस्यैव सम्यक्त्वे प्रकृतन्यायावयवत्वपर्यन्तवैयर्थ्यात् किं तु वह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणस्य वह्निसाध्यको
पनये इति व्याप्तिवारणार्थमेव प्रथमं प्रकृतपदं द्वितीयं तु तस्यैव लक्षणस्य वह्निव्याप्यसाध्यकोपनये इति व्याप्तिवारणार्थं तादृशोप
नयस्यापि यत्किंचिदनुमितिसमानार्थकत्वात् ॥ न च वह्निसाध्यकप्रतिज्ञालक्षणेनुमितेर्बोधस्य प्रकृतत्वे वह्निव्याप्यसाध्यकप्र
तिज्ञालक्षणे न्यायावयवत्वे नोप्रकृतत्वं तद्भिन्नत्वे वह्निसाध्यकोपनयस्य वारणायेस्ति किं तेषां नासंगतिरिति वाच्यं तथापि तल्ल
क्षणस्य प्रकृतद्वयस्य व्यावृत्तये न ध्याने सत्प्रभावे योध्यापत्तेरिति ध्येयं प्रकृतपदार्थं व्याकरोति यादृशपक्षसाध्यके तिय धर्माव
च्छिन्नसाध्यकयद्धर्मावच्छिन्नपक्षके इत्यर्थः तद्यद्धर्मावच्छिन्नसाध्यकस्यावयवत्वे सति यद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूना
नतिरिक्तविषयकशाब्दधीजनकत्वमेव तद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वं तु तद्धर्मावच्छिन्नपक्षकत्वं यो॰ प्रवेशो न्याय्य इति वाच्यं ॥

तद्धर्मावच्छिन्नसाध्यकानुमितिविषयितासमनीयतविषयताकत्वपर्यवसानस्य तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनातिरिक्तविष-
यकत्वस्य बोधमात्रएवाप्रसिध्याप्रतिज्ञामात्रएवालक्षणस्यासंभवापत्तेः प्राचस्तु बाधितविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादिसा-
दिसद्धलीय हेत्ववयववैविषयत्वमात्रपक्षधूमज्ञानजन्यज्ञानीयत्वसाध्यकप्रतिज्ञालक्षणस्यातिव्याप्तिवारणार्थं निवेश्यं तद्धर्मावच्छिन्नप-
क्षकहेत्वन्यायावयवानिवेशनीयः अन्यथा तत्रापि धूमज्ञानजन्यज्ञानतावच्छिन्नसाध्यकन्यायावयवत्वस्य विषयतावच्छिन्न-
पक्षकधूमज्ञानजन्यज्ञानतावच्छिन्नसाध्यकशाब्दधीजनकत्वस्य च सत्त्वेन नातिव्याप्त्यापत्तेः बाधितविषयतावच्छिन्नपक्षकन्या-
यातिरिक्तहेतोर्विषयत्वतावच्छिन्नपक्षकन्यायावयवत्वाभावादिवक्तुमसात् इयं चानुमितावपि तद्धूमावच्छिन्नपक्षकत्वं देयं अन्य-
था बाधितविषयत्वतावच्छिन्नप क्षकोपदर्शितप्रतिज्ञायाएव लक्षणस्य तत्र सत्त्वेन हेतुवाक्ये अतिव्याप्त्यापत्तेः तत्रापि विषयत्वतावच्छिन्नप-
क्षकप्रकृतसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वादिसत्त्वात्तु [illegible] हेतोरपि [illegible] स्थलेऽनुमितावालोकनिष्ठमे-
व धूमज्ञाप्यत्वं विषयः हेत्ववयवजन्यबोधे वह्निनिष्ठमपि धूमज्ञाप्यत्वं भासत इत्यतिरिक्तविषयकज्ञानजनकत्वादेवोक्तहेतावतिव्याप्त्यसंभ-
वइतिवाच्यं॥ एतदन्यतमकोटौ नैवादिपदेन [illegible] माद्वाच्यत्वे तत्र वै प्रमेयं ज्ञेयत्वादि विधादिसद्धलस्योपग्रहात् प्रकृतानुमितिविषयतावच्छिन्न-
ताविषयतानन्यत्वस्य प्रकृतव्याप्तविषयकत्वरूपस्य वा वक्ष्यमाणानतिरिक्तविषयकत्वस्य धूमादालोकवान्यवर्ती वह्निमान्धूमादित्यादि

न्यायस्थलीयहेतावपि सत्ताद्वयं तु धूमात्तेजस्वी पर्वतो वह्निमान्धूमादित्यादिस्थलीयहेतावति व्याप्तेवा तया धर्मेणान्यूनपदे तत्र वह्निनिष्ठ-
स्यैव धूमज्ञानज्ञाप्यत्वस्यानुमितौ हेतुजन्यबोधेऽभानादिति तत्तुच्छं तत्र प्राधर्मिके न हेतुजन्यबोधे न आकांक्षादिसाम्याद्धूमज्ञाप्यत्वस्य
द्रव्यत्वादिनिष्ठस्य धूमज्ञाप्यत्वस्य विषयीकरणादनतिरिक्तविषयत्वासंभवात् ननु निगमनस्य पक्षतावच्छेदकरूपेण पक्षबोधकत्वा
दन्यूनपदे नैव तद्वारणासंभवतीत्यत आह यद्यपीति सबाधितप्रकारेण पक्षवाचकमतु बाधकमेव निगमनेनस्तीत्यतः साक्षादिति पक्षता
वच्छेदकरूपेणेति तदर्थः न्यूनतेति निगमनस्य प्रतिज्ञासमानाकारबोधजनकतायामेव पुनरुक्तत्वप्रतिसंधानादबाधितत्वादिपरत्वं
तस्य लभ्येत नान्यथेति भावः॥ अयमदोषत्वादिपदादिप्रमितिकत्वात् लिंगेन पुंस्त्वके च दनिमस्य परिग्रहः कथमिति अन्यूनविषयकत्वमि
त्यर्थः उपनेति अयमादिपदाननुषंगादन्यूनविषयकबोधजनकत्वे नैवेत्यर्थः॥ निगमनस्यापि कथंचित्सामर्थ्यबोधकत्वान्नपराम
र्शहेतुत्विति मूलासंगतेत्याह। तदर्थमिति नेपरामर्शहेतुरिति इदं च सत्यं तन्मूलस्य यथाश्रुतार्थमभिप्रेत्य ये नोक्तं सत्यं तस्यैव प्रकृ
तन्यायावयवार्थकतया व्याख्यातत्वादिति भावः निरुक्तेति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकबोधजनकत्वे सति प्रकृतन्या
यावयवत्वमर्थः तदपि निगमनमपि अबाधितत्वादेवि त्वादिपदादसत्प्रतिपक्षितत्वसंग्रहः अबाधितत्वादेर्वेनपदार्थतया

प्र

निगमनबोध्यत्वासंभवादाह तद्बोधेति विशिष्टेति व्याप्तिपक्षधर्मताविशिष्टस्य हेतोर्यः साध्यव्याप्यत्वलक्षणः संबंधस्तद्बोधज-
नकतयेत्यर्थः अत्र च निगमनस्यानुवादत्वप्रतिसंधानोत्तरमेवाबाधितत्वादेर्मानसग्रहोत्पत्त्या कथं चेत्तद्बोधोपधायकत्व
बोध्यं मिश्रमतमनुपपन्नमिति यदि तीति तदिति अनतिरिक्तपदमित्यर्थः तेन उक्तोदाहरणेन पृथिवीव्याप्तिमिति पृथिवीतद्वत्तावह्निम-
द्भेदाभावस्यैव तेन बोधनात् तथा चानुमितिन्यूनविषयकत्वादन्यूनपदेनैव तद्वारणं संभवतीति भावः ननु क्वस्थलेपि ता-
त्पर्यभ्रमेण पृथिवीव्याप्तितद्भेदः संभवत्येवेत्यत आह तात्पर्यमिति तादृशबोधेति अनुमित्यन्यूनाविषयकबोधेत्यर्थः अतिप्र-
सक्तत्वात् अवयवान्तरेपि तत्त्वात् अथ अवयवान्तरे तत्त्वेपि न क्षतिः तस्यातिरिक्तविषयबोधजनकतया अनतिरिक्त-
पदेनैव वारणासंभवादत आह नवीनेति तावतापि तात्पर्यभ्रमेणापीत्यर्थः तथा तस्य अन्यूनविषयकबोधजनकत्वस्य संभ-
वः यन्मते वादेपीति तथा च तात्पर्यभ्रमादावप्येकदेशस्यैव अन्यूनाविषयकज्ञानजनकत्वं न समुदितोदाहरणस्य तस्य च
न्यायावयववाक्यार्थकेन सर्वं तदन्त्येनैव वा न चास्य भवतीति भावः चित्रगुः स्यादिति प्रतिज्ञायां चित्रपदसमभिव्याहारेण बो-
धजनकत्वमिव प्रकृतेपि यन्नैसादिपदसमभिव्याहारेण तादृशबोधजनकत्वस्याक्षुण्णत्वात् न किंचिदेतत् नायमादीति

तथा चान्यूनविषयकत्वाभावादेव निगमनव्युदासात् द्वारणार्थं न नाति निरुक्तपदं व्यर्थमिति भावः नन्वेवं न्यूनतातादवस्थ्यमत आ
ह वाक्येति उपनयनिगमनस्वरूपयोर्वाक्ययोरेकवाक्यताबलात् विशिष्टवैशिष्ट्यान्वयबलादेव विशिष्टस्य प्रकृतसाध्यविशिष्टप्र
कृतपक्षस्य लाभादित्यर्थः तथा च विनाप्यनुपनयमबाधितत्वादि चौधसम्भवात्तदनुसन्धेयं नर्थं व्यर्थमिति भावः यत्र पक्षता
वच्छेदकावच्छेदेन साध्यसिद्धिरुद्देश्या तत्र तदवच्छेदेनैव साध्यस्य पुनरुक्तज्ञानमबाधितत्वादिग्रहोपयोगि तच्च वाक्यैकवा
क्यतया बोधान्न सम्भवति वह्निव्याप्यधूमवत्पर्वतत्वावच्छेदेन वह्निमत्त्वग्रहेऽपि पर्वतत्वावच्छेदेन वह्निमत्त्वाग्रहात् अन्वयिता
वच्छेदकधर्मावच्छेदेनैवान्वयस्य व्युत्पन्नत्वादनुमितौ पक्षस्यैव समन्यत्वमिया वेद्यं तु यदि चेमुक्तं सामान्यतोऽधिकरणप्रकारे
णोपनयस्येति वारणाय तदि समैत्र्येऽन्वयः नन्वपक्षतावच्छेदकाविशिष्टसाध्यवैशिष्ट्यावगाहित्वमेव अन्यूनविषयकत्वं निरुक्तो
पनयवारणासम्भवादिदमसङ्गतमिति वाच्यं यत्राधिकरणांशे मेयं ज्ञेयत्वादित्यादि क्रमेणान्यायस्तत्रोपनयस्य पक्षतावच्छेदकीभू
ताधिकरणांशविशिष्टत्वसाध्यवत्तावगाहित्वादाधिकरणतावच्छेदेन प्रमेयत्वसिद्धेरुद्देश्यत्वादेव सिद्धसाधनाद्यावातादिति भावः
अथान्यूनाविषयकत्वमेव नर्यं पक्षाविशेष्यकसाध्यप्रकारकत्वं वाच्यं तथा च पक्षानिष्ठमुख्यविशेष्यत्वप्रवेशेनोपनयवारणासं

भवात्तद्वारणार्थं विशेषणोपादानमयुक्तमत आह। यत्र चेति। तद्रूप्येणेति पक्षतावच्छेदकरूपाभ्यामित्यर्थः तथा च पर्वतो वह्निमान्धू
मो यो यो धूमवान्स वह्निमान्यथा पर्वत इत्यादिस्थलीयोदाहरणस्य पर्वतो वह्निमान्वह्नेरित्यादिस्थलीयस्य वह्निव्याप्यवह्निमा
श्चायमित्युपनयस्य च वारणार्थमनतिरिक्तपदं तत्रापि यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्त इत्यभिमतमतेनिरुक्तोदाहरणेऽतिव्या
प्त्यसम्भवादुपनयपर्यन्तानुसरणं यत्तु दृष्टान्तस्योदाहरणाद्यघटकत्वपक्षेतिव्याप्त्यसम्भवादुपनयानुसरणं तत्तुच्छं तथा स
ति सर्गे सामानाधिकरण्येन दृष्टान्तवत्त्वमादायोदाहरणेति व्याप्तिप्रदर्शनस्य सन्देहविरोधापत्तेः न च साध्यहेतूक्तत्वान्यायघटकत्वास
म्बीकृतस्तदुपनयोतिव्याप्तिः उद्देश्यतावच्छेदकविधेययोरैक्याद्यो यो वह्निमान् स वह्निमानित्युदाहरणस्य निराकाङ्क्षत्वेना
सम्भवादिति वाच्यं यद्योगप्राधान्यादिबललभ्यस्य वह्निव्यापकत्वविशिष्टवह्नेरेव विधेयत्वाद्दण्डवान् रक्तदण्डवानित्यादेरिवोदा
हरणस्यापि निराकाङ्क्षत्वासम्भवात् व्यापकत्वस्य संसर्गमर्यादया भानमतेऽपि संयोगमात्रेण वह्निमत्त्वे व्यापकत्वविशिष्टसं
योगेन वह्निमत्त्वान्वयबोधे बाधकाभावात् एकसम्बन्धेनोद्देश्यविधेयभावे निराकाङ्क्षत्वादिति ध्येयं ननूक्तस्थले पक्षे साध्य
सन्देहाभावान्न्यायप्रयोगघटना कुतस्तत्र सोदाहरणादाविति व्याप्तिरत आह सिसाधयिषयेति ननु सिसाधयिषया न्यायप्रयो

नो विवादग्रस्त इत्यत आह यत्रेति। पर्वतत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे सिद्धसाधनापत्तेरतः पर्वतत्वावच्छेदेनेत्युक्तं
यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्तवचनमिति प्राचांप्रवादरक्षार्थमेतदुदाहरणस्येति यद्यपि पर्वतत्वावच्छेदेन जातिमत्त्वस्योद्दे
श्यतायां जातिमत्पर्वतस्य तादात्म्येन हेतुत्वे तत्रावयवमात्रेति व्याप्तिसंभवादुदाहरणमा। नोक्तिर्न संगता तथापि पक्षमुख्यविशेष्य
क साध्यवत्त्वावगाहित्वरूपस्यान्यूनविषयकत्वस्य प्रवेशेनावयवांतरेति व्याप्त्यसंभवात् तन्मात्रानुसरणमिति भावः ननु यन्मते दृ
ष्टान्तमनंतर्भाव्यैवोदाहरणाकारी तन्मते न्योदाहरणेति व्याप्तिः संभवती अत आह। सर्वत्रस्यैवेति ननूक्तदृष्टान्तस्य पर्वतत्वसा
सामानाधिकरण्येन वह्निमत्त्वबोधकत्वेप्यनुमितिविषयीभूतस्य पर्वतत्वावच्छेदेन वह्निमत्तस्याबोधकत्वादन्यूनपदेनैव वारणसं
भवती अत उक्तं सर्वत्रस्यैवेत्यपि वदंति तन्मे अयोदेवः सौदामिनीद्रव्यमित्यादिप्रतिज्ञोक्तदेवत्रास्य मेअयो देवो दामिनी द्रव्यमित्यादेरपि
प्रकृतानुमितिसमानाकारबोधजनकत्वात् न्याति व्याप्तिरत उक्तमवयववाच्यटकेति अवयववाच्यटकत्वे सति यन्यायांतर्गतत्वे सती स
र्थः हेतत्वस्य प्रतिज्ञादिहेतुभागस्य न्यायस्य पूर्वप्रतीकेव्यावृत्तिमुक्तोपनप्रतीकेपितामाहायमादीति हेत्वघटितत्वे क्वापि हेतुत
भागस्य वारणासंभवादयमादीत्यपि कश्चित् न चोपनयादिनिगमनो तर्भागेप्यतिव्याप्तिसंभवादयमादिपर्वतानुधावनं व्यर्थमि

९

तिवाच्यैपक्षतावच्छेदकमात्रावच्छिन्नविशेष्यकसाध्यप्रकारकत्वरूपान्यूनविषयकत्वविवक्षयापि तद्वारणासंभवादिति भावः। तन्न अ
नतिरिक्तपदेन च साध्यतावच्छेदकधर्मावच्छिन्नविधेयताकत्वरूपमन्यूनविषयकत्वं निरुच्यैव प्रतिज्ञादिहेतुत्वाभावादेर्वाभ्यासंभ
वादनतिरिक्तपदव्यर्थं तत्र धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्नस्यैव विधेयत्वादिति वाच्यं। विशिष्टवैशिष्ट्यविषयतातिरिक्तस्य विधेयत्व
स्यानंगीकारात्तादृशविशिष्टविषयतायाः प्रकृतेपि सत्वादनतिरिक्तपदसाधकत्वाधर्मिवत्ताबद्धनाविवक्षणाच्च। वस्तुतः प्रतिज्ञासह
कारेणाहेत्ववयवस्योपस्थाप्यपदसहकारेण निगमनस्यान्यूनविषयकज्ञानजनकत्वात्सप्तं। तस्यावयवार्थकत्वेपि हेतुनिगमनयो
र्वारणायानतिरिक्तपददेयं न त्वन्यूनविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितजनकत्वं निरुक्तिविशिष्टसंभवादिति युक्तमुत्पश्या
मः पच्यपीति सर्वस्य पक्षत्वे व्यतिरेकिणः साध्यस्याज्ञातोबाधितत्वात्साध्यकोनसन्व्याप्य इति केवलान्वयिनः साध्यतयोल्लेखः
अतिरिक्तेति प्रकृतानुमितिविषयतातिरिक्तेत्यर्थः तद्विषयितायाः केवलान्वयित्वादिति भावः। न चेति वाच्यमित्यग्रेन्वयः कोटीति प्र
मेयत्वाभावरूपेत्यादिः संदिग्धएवन्यायप्रवृत्तेरावश्यकत्वादाह। संशयस्य चेति। ननु खंडशः प्रत्येकपदार्थप्रसिध्यैव सर्वप्रमे
यं नवेति संशयः संभवतीत्यत आह। प्रकृतेति प्रकृतानुमितिविषयतासमव्यापकविषयताकत्वमित्यर्थः। सामानाधिकरण्यांश

राम

स्य वैयर्थ्येनाप्रविष्टत्वादिति द्रष्टव्यं सर्वपक्षकोपनयमात्रेति व्याप्तेः कल्पान्तरमाह ॥ प्रकृतानुमितीति व्यक्त्यभिप्रायस्यान्यूनानतिरिक्तविषय
कत्वदलेनेत्यादिः सकलेति सकलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजना केवलान्वयिसाध्यकन्यायस्य विप्रतिपत्तिसंशयाद्यभावे
नास्वीकाराद्व्यतिरेकिणः साध्यतयोल्लेखः तत्रानुमितौ विवोपनयेव स्तुमात्रस्यैव प्रकारत्वात् तत्राति व्याप्तिरिति भावः। ननु निरवच्छिन्नप्र
कृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वाच्यं तथा चानुमितौ स्वरूपतः प्रकाराणामभावत्वप्रतियोगित्वादीनामुक्तस्थली
योपनये व्याप्त्यादिघटकतया स्वरूपतः प्रकारत्वान्न तत्राति व्याप्तिरत आह। सकलाभिधेयानिष्ठेति तथा च सकलाभिधेयानिष्ठा
र्यन्ताभावप्रतियोग्याकारत्वाश्रयताश्रयवदिदमाकारत्वादिप्रयादितादात्म्यसंबन्धावच्छिन्नहेतुकन्यायस्थलीयोपनयेऽतिव्याप्तिः तत्रानु
मितौ उपनये च स्वरूपतः प्रकाराणां तुल्यत्वादिति भावः समव्याप्तत्वं विहाय समसंख्याप्रकारताकत्वोक्तौ न कोऽपि दोष इति ध्येयं ॥
प्रकृतपक्ष इति पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारताकत्वमित्यर्थः तदन्यूनावि
षयकत्वं प्रकृतानुमित्यन्यूनविषयकत्वं तत्र यदि निरुक्तविषयतादिलक्षणा विषयता तावन्न्यूनत्वरूपमनतिरिक्तविषयकत्वं निवेश्येत
तदा पर्वतादिप्रकृतत्वानुक्तौ वह्निमद्व्याप्तेजस्वी पर्वतो वह्निमान् वह्निमद्व्यादिसत्तादात्म्येन हेतवयवेति व्याप्तिः तद्व्यापि द्रव्य
त्वेनैव पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वात् यदि च प्रकृतव्याप्तविषयकत्वरूपमेवानतिरिक्तविषयकत्वं प्रवेश्यते तथापि पर्वतो वह्निमा

न्, वह्निमद्व्यादिसाध्यादिस्थलीयहेतावतिव्याप्तिवारणार्थं तद्बोध्यं साध्यीयप्रकृतत्वस्य व्याप्यवृत्तित्वस्य माह प्रकृतपंचम्यर्थेति ज्ञापकत्वादिरू
पायः पंचम्यर्थकं सत्वप्रकृतक इत्यर्थः तथा च हेतुत्वं वाच्यत्वप्रमेयत्वादिसाध्यादौ हेतुत्ववयवस्य पंचम्यर्थ हेतुत्वे प्रकृतपक्षे वाच्यप्रभेदस्य प्रमेयत्वसा
ध्यस्य वैशिष्ट्यावगाहित्वेपि साध्यतावच्छेदकीभूतवाकच्यत्वप्रकारेण तद्वैशिष्ट्यानवगाहनान्नातिव्याप्तिः हेतुत्वं वाच्यत्वव्द्वाच्यत्वादि
त्यादिकं तु न न्यायः सिद्धसाधनादिति भावः इत्थं च व्याप्तिविषयकत्वरूपमनातिरिक्तविषयकत्वं लक्षणे प्रविष्टमित्याशयेनोक्तं प्रकृतप
क्षे प्रकृतसाध्यवैशिष्ट्यविषयताविलक्षणाविषयताशून्यत्वस्य प्रवेशात्तु ज्ञापकत्वं प्रमेयत्वाद्वाच्यवान्निष्टधर्मवत्प्रमेयत्वादिसाध्यादौ पर्वतो
वह्निमत्त्व तात्तेजस्वी वह्निमत्पर्वतादिसाध्यादौ च हेतुत्ववयवस्य वारणाय साध्यस्य प्रकृतत्वमिति ध्येयं अन्यच्च प्रकृतसाध्यवैशिष्ट्यविषयताक
त्वं साध्यतावच्छेदकधर्माविच्छिन्नाविधेयताकत्वपर्यवसितं ग्राह्यमिति नव्यमते ज्ञानज्ञाप्यत्वस्य हेतुपंचम्यर्थत्वाद्विषयत्वं धूमज्ञानजन्यज्ञा
नियं धूमादिसाध्यादौ हेतुत्ववयवस्य प्रकृतसाध्यप्रकृतपक्षवैशिष्ट्यावगाहिबोधजनकत्वेपि न तत्रातिव्याप्तिः ज्ञानज्ञाप्यत्वरूपपंचम्यर्थैक
देशस्य ज्ञानजन्यज्ञानस्य तदर्थविषयतायां विधेयतया अनन्वयात् वृत्तिद्वयोपस्थाप्ययोर्वा द्वैरूप्यविधेयभावेनान्वयस्याव्युत्पन्नत्वा
दिति वदंति तादृशेति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्याविषयताविलक्षणाविषयताशून्यत्वमित्यर्थः ॥ तादृशाविषयताविलक्षणेत्यत्र
तादृशाविषयताभिन्नत्वं स्वविशिष्टेयैवप्रातिज्ञाजन्यबोधस्य तादृशाविशिष्टविषयताभिन्नसाध्यादिप्रत्येकविषयतावत्वेन प्राप्तेज्ञामा

त्रए वा संभवापत्तेः किंतु तादृशाविषयताव्यापकत्वं तथा च तत्र साध्यपक्षयोः प्रकृतत्वानुमापतिज्ञायामसत्त्वस्यात् तज्जन्यबोधविषय
तामात्रस्यैव सामान्यतः साध्यविशिष्टपक्षविषयत्वव्यापकत्वादतस्तदुपात्तेननुज्ञानभेदेन स्वरूपसंबंधात्मिकानां विषयतानां व्यक्तीनां
भेदात्प्रतिज्ञाजन्यबोधानामपि न तादृशविषयताव्यापकविषयताशून्यत्वमिति संभवः समानाकारविषयतानामेकस्य विवाद
ग्रस्तत्वादतः प्रकारान्तरमाह। प्रकृतहेतुकेति अन्वयव्याप्तित्वेन प्रवेशो व्यतिरेकिणि निगमनेति व्याप्तिमतः सिद्ध्यौपयिकत्वं प्रकृतहेतु
मत्ताभिनिश्चयोत्तरप्रकृतसाध्यकानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयताशून्यत्वमर्थः तेन वह्निव्या
प्यधूमवान्निरूपितसंयोगेन पर्वते वह्नेः साध्यतायां पर्वतो वह्निमान् धूमादित्यादिस्थलीयप्रतिज्ञादौ या संबंधमर्यादया वह्निधूमयोर्व्यापक
वगाहित्वेपि तन्मात्रव्याप्तिः पर्यायविवक्षेयं न्यायावयवत्वं गर्भे निरुक्तावेव अन्यथा तज्ज्ञानेपि हेतौ तद्भानेति व्याप्तिर्भविष्यते तथा च निग
मनस्यापि मादृशपदघटितत्वकल्पे अन्यूनपदे नैव तद्धारणसंभवः तथाप्यन्वये व्याप्तिव्यक्तीनां नानाविधत्वादेकोपादानेऽन्यासंतर्भाव्यपक्ष
तावच्छेदकसामानाधिकरण्येन दृष्टान्तवदुदाहरणोपोति व्याप्तेर्वा निपात्योक्तानुस्याद्व्यकत्वादिदिशाभावः प्रकृतहेतुप्रवेशस्य फलमाह वह्नि
व्याप्योति वह्निव्याप्यालोकवत्पर्वते नपक्षत्वेतद्रूपावच्छिन्नवह्नेः संज्ञायाभावान्न्याय एव नावतरतीत्यर्थः तः न धूमेति य तु वह्निव्याप्या
लोकवत्तया गृहीते पर्वते वह्निसाध्यकहेत्वाकांक्षा न संभवतीत्यतः स धर्मपदमिति तत्तुच्छपर्वतधर्मिकवह्निसिध्यौपयिकहेत्वाकांक्षानु

स्तावपि वह्निव्याप्यालोकवत्पर्वतत्वावच्छिन्नधर्मिकस्यानुमितेरुपयुक्तहेत्वाकांक्षाया बाधकाभावात् प्रकृतपक्षस्य प्रकृतसाध्यवत्त्वं कुतु इ
त्याकांक्षयैव हेतुप्रयोगादिति प्रकृतसाध्यप्रवेशस्य फलमाह इंधनव्याप्येति तस्याः प्रतिज्ञायाः इदं तु बोध्यं सत्तस्य न्यायावयवार्थपक्षत्वाव
कल्पोऽभिहितः तेनावयवाघटकन्यायांतर्गतस्य हेतुतभागस्य प्रकृ — सविषयकत्वेऽपि न तत्रातिव्याप्तिः न चैवमनतिरिक्तपदवैयर्थ्यं अ
न्यूनविषयकत्वाभावेनैव अवयवांतरव्युदासादिति वाच्यं पर्वतत्वावच्छेदेन वह्नेः साध्यतायामेतत्पर्वतत्वावच्छेदेन दृष्टांतवत्युदाहरणे अ
तिव्याप्तिवारकत्वात् न च तथापि पर्वतो वह्निमान्वह्नि प्रमितिमाकारकबोधस्यापि तावदन्यतमत्वाद् वह्नि धूम ज्ञाप्यो नवेति संशयस्यापि
तादृशान्यतमबोधानवरुद्धत्वादतिव्याप्तितादवस्थ्यं तथापि केवलप्र(?)वर्तादियादौ हेतववयवेति व्याप्तिः तस्या व्याप्यविषयकत्वेनानति
रिक्तविषयकत्वात् पक्षे साध्यवैशिष्ट्यावगाहित्वेनान्यूनविषयकत्वात् पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाद् देवासिद्धसाधनात्संभ
वादिति वाच्यं पक्षमुख्यविशेष्यकसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविवक्षयैव तद्वारणात् पंचम्यर्थहेतुत्वस्यैव तन्मु
ख्यविशेष्यकत्वादिति दिक् च चित्तु सर्वतस्यावयवाघटकन्यायांतर्गतार्थकत्वेऽपि न हेतुत्वभागेति व्याप्तिः तन्नावयवावघटको यत्क
स्यावयवस्याघटकमि सेव समासद्वयाश्रयणादेवावयवद्वयाघटितत्वे सत्यवयवाघटकत्वस्य लाभात् प्रथमे न हेतुत्वतस्याद्वृति

येनाचित्रभानुः प्रमेयइत्यादिप्रतिज्ञैकदेशो भानुःप्रमेयइत्यादावतिव्याप्तेर्वारणादित्याहुः नन्वेवंवह्निव्याप्यधूमवान्पर्वतोवह्निमान्धूमा
दित्यादौप्रतिज्ञायामव्याप्तिःतस्याःप्रकृतव्याप्तिविषयकत्वात्पक्षतावच्छेदकीभूतव्याप्तिभिन्नतायाएवव्याप्तेर्विधेयकोटिप्रविष्टत्वयो
पनयस्योद्देश्यविधेययोरैक्यसंभवेननिराकांक्षत्वयोगात्तत्राह वह्निव्याप्येतिसंयोगेनाव्याप्तिमुक्त्वा समवायेनतामाहसत्तादीति
अन्यथाविनाप्याकांक्षामभिधानेअतिप्रसंगादितिप्रयत्नेहेत्ववयस्याप्युद्भावनप्रसंगादित्यर्थः अतएव आकांक्षाविरहादेवनैक
देति समयबंधाविनेत्यादि तेनान्वयव्यतिरेकोभयव्याप्तिबोधकोदाहरणाकांक्षाप्रयोजकावयवत्वेनमपिहता वक्ष्यमाणस्यान्वयव्याप्ति
नोकिहेत्ववयवस्यनासंगतिः समयबंधानुरोधेनैवव्याप्तिद्वयेनोदाहरणसंभवादितिध्येयंउभयव्याप्तौत्वत्रव्याप्तिपदमनेकजातीय
व्याप्तिपरमतोनासंगतिरितिपरमार्थः यादिमीमांसमते नैव मयापक्षेसाध्यसाधननिष्पत्तिप्रत्यादिसमयबंधवशाद्धूमानिष्टामन्वयव्या
प्तिपक्षतावच्छेदककोटौनिवेश्यव्यतिरेकव्याप्त्याधूमहेतोरुदाहरणोपस्थापनसंभवस्तदातत्रप्रतिज्ञायामव्याप्तिरितिभावनिष्पत्त्यादिश्चे
तिसूक्ष्ममीक्षतइत्यग्रेन्वयः खलेकपोतन्यायेनैवशाब्दस्वीकारेपर्यन्तीत्यादेःपाकत्वातिव्याप्यवह्निः नसाध्यबोधकत्वासंभवादित्या
कर्षणमतेपाककर्तुर्देवतादात्म्यसंबंधेनतत्रसाध्यवत्तिप्रकारत्वाच्चाह अयंगौरिति आदिनाघटोनेतरात्मीत्यादेःपरिग्रहः ननुव्युत्पत्तिवि

जाद्यादयः गोत्वादिप्रतिज्ञायाः पक्षे साध्यीभूतगोत्ववैशिष्ट्यज्ञानजनकत्वं कथं तत्र उपदर्शितज्ञानजनकत्वमत आह तादात्म्येनेति गो
त्वादेः साध्यतायां स्वयं बाधकमाह गोत्वत्वादीति अनुपस्थितेरिति गवादिपदादनुपस्थितेरित्यर्थः तथा च साध्यतावच्छेदकरूपेण साध्यवत्त्व
बोधकवाक्यस्य प्रतिज्ञात्वान्न तस्य गोत्वसाध्यकप्रतिज्ञात्वसंभव इति ननु तादात्म्येन गोत्वादेः साध्यतायां निरवच्छिन्नतद्वैशिष्ट्यबोधकवाक्य
स्यैव प्रतिज्ञात्वं स्यादित्यत आह । पदार्थतावच्छेदकेति घटादन्यत्वादेरेकदेशेऽपि पर्वतस्यार्थान्वयाज्ञानताविरहेण ननु पर्वतो वह्निमानित्या
दिस्थले अनुमितावपि वह्निमानेव साध्यत इत्यत आह । तथात्वेति वह्नेः साध्यतायामेवेत्यर्थः अन्यथा वह्निमद्व्याप्यवांश्च अयमित्येवंत
त्रोपनयः स्यादिति भावः अभेद इति भासत इति पूर्वेणान्वयः तथा च वह्न्यादिसाध्यकप्रतिज्ञाया वह्न्यादिसाध्यकानुमित्यन्यूनविषयक
ज्ञानजनकत्वाभावात्तत्राव्याप्तिरिति भावः ननु साध्यपक्षादिभेदेन प्रतिज्ञाया भिन्नत्वाद् वह्न्यादिसाध्यकस्थले पक्षे साध्यवच्छेदभेदबो
धकत्वमेवान्यूनविषयकत्वं वाच्यमत आह । एवमितीति तथा चाभिप्रेतद्वयस्य भेदाभयप्रकारकबोधस्यापि निर्मितत्वं तादात्म्येन भेदाभ
यप्रकारताबोधस्य जनिकाया भेदसाध्यकप्रतिज्ञाया एकविधस्योपादानेऽन्यविधबोधजनिकायास्तस्या न व्याप्तिरिति भावः ॥ यादृशा
पक्षसाध्यका इति बहुवचनेन तथाविधयावत्प्रतिज्ञालाभार्थं अन्यथा सर्वस्याः पृथिवीपक्षके तद्भेदसाध्यकप्रतिज्ञास्थलीय कतिपयबो
धानिवर्तनीयस्य संशयानिवर्तकत्वेन तत्राव्याप्तिप्रसंगात् एवं च पक्षसाध्यका यत्पक्षका यावत्प्रतिज्ञाः प्रकृतपक्षे यादृशाया यादृशबोध

जनकत्वेन संप्रदायसिद्धा इत्युक्तावसंभवः स्यादतो यादृशपक्षसाध्यका इति पक्षसाध्ययोरुपादानमिति ध्येयं पक्ष इति प्रकृतपक्षतावच्छेदकवि
शिष्टे धर्मिणीत्यर्थः तेन रूपान्तरावच्छिन्नपक्ष एव साध्यस्य तादृशो यो बोधस्तदनिवर्तनीयसंशयनिवर्तकत्वेपि हरिणोऽव्यभिचारो दोषः वाहेन
पक्षतास्थले च पाण्डुरत्वेन द्रव्यत्वबोधमादाय प्रतिज्ञायामुक्तासंभवः वस्तुतः पक्षतावच्छेदकविशिष्टपक्ष इत्युपहाय यादृशयादृशधर्मावच्छिन्न
धर्मिणीत्येव वक्तुमुचितं अन्यथा संयोगेन वह्न्या वह्निमानेव पर्वतो द्रव्यत्वादेः साध्यतायां वह्निमत्सर्वतो द्रव्यत्ववानिमादिप्रतिज्ञायाः वह्नि
मद्वृत्तित्वेनैव पर्वते द्रव्यत्वबोधकत्वेनाव्याप्तेरिति ध्येयं तादृशानामिति प्रकृतपक्षविशेष्यकतद्धर्मावच्छिन्नविधेयताकबोधानामित्य
र्थः तावद्बोधानिवर्तितं नकस्यापि संशयस्य स्यादतो अन्यतमेति अपिशब्दस्य सामान्याभावलाभार्थः तेन हेतोः साध्यतायां हेतुप्रका
रकबोधानिवर्त्यस्य कर्तृसंशयस्यानिवर्तकत्वाद्बोधः तज्जनकत्वेपि चैत्रः कर्तेति प्रतिज्ञायां नाव्याप्तिः अनिवर्तक इत्युक्ते नातिने वि
कविषयकत्वमुपपादितं तत्प्रयोजनं च हेत्वंतभागस्य वाच्याभिमुखं तत्र मम एवं तावद्बोधानिवर्त्यस्य वह्निधूमज्ञाप्यो नवेति संशयस्य
निवर्तकबोधजनकत्वहेत्वंतभागस्य यत्रापि हेत्वंतज्ञानं तस्य पर्वतो धूमज्ञाप्यवह्निमानित्याकारकबोधस्यापि तावदन्यतमत्वाद्वह्नि
धूमज्ञाप्यो नवेति संशयस्यापि तादृशान्यतमबोधानिवर्त्यत्वादतिव्याप्ति तादवस्थ्यं तथापि केवलप्रतिज्ञाव्यक्तीनां यादृशयादृशबोधज
नकत्वं तादृशतादृशशब्दधीसामान्यमत्र प्रतिबंधकतदन्यसंशयानिवर्तकं विवक्षितं तथा च वह्निधूमज्ञाप्यो नवेति संशयस्य केवल

प्रतिज्ञाजन्यबोधे नाप्रतिबंधान्न हेतुंतभागेऽपि प्रसंगः किंदतुचिं सतेयद्येवमपि सन्नायपदं व्यर्थं प्रकृतपक्षसाध्यकप्रतिज्ञाव्यक्तीनायां
दृशायादृशधीजनकत्वं तादृशा तादृशशाब्दसामान्ये यत्र प्रतिबंधकं तदन्यानिवर्तकत्वमात्रस्यैव समकृतात् नचैतत्कालीनं वह्निमत्तया प
र्वतस्य शाब्दज्ञानं जायतामिति छाया अपि प्रतिज्ञाजन्यशाब्दसामान्याप्रतिबध्यत्वात्तन्निवर्तकं यदेतत्कालीनं वह्निमत्तया पर्वतस्य
शाब्दज्ञानं तज्जनिकायामिदानींतनप्रतिज्ञायां अव्याप्तिवारणाय सन्नायपदमिति वाच्यं ज्ञानपदेनाप्युक्तेः ज्ञानादावव्याप्तेर्वारणास
म्भवे सन्नायपदप्रवेशस्य तथाप्यनौचित्यात् किं चैतत्कालीनस्य प्रतिज्ञाजन्यतादृशशाब्दस्य नियुक्तेः तन्निवर्तकत्वेऽपि तदनिवर्तकस्य काला
न्तरोत्पन्नस्यैव वह्निमत्तया पर्वतशाब्दस्य स्वरूपयोग्यतयेदानींतनप्रतिज्ञायां लक्षणसंभवात् नाव्याप्तिशंकापि यत्र चातव्ये स्यादि
नार्थं धर्मस्तैव तादृशशाब्दस्वरूपयोग्यतायानि तस्तौ निवेशानिष्प्रयत्वात् एतेन प्रतिज्ञाजन्यशाब्दमात्रस्य न समानाकारशाब्दप्रतिबंधि
तेकभूतासतेः शाब्दज्ञानीतत्वे सादेन वभूतावरह विशिष्टसामान्नाकारशाब्दत्वेनैव शाब्दधीविरोधित्वात् तथा च प्रतिज्ञाजन्यशाब्दसा
मान्ये यत्र प्रतिबंधकं तदन्यस्य समानाकारशाब्दस्यैव निवर्तकत्वं प्रतिज्ञाजन्यबोधस्यापि संभवापत्तिरिति तत्सन्नायपदमिति पास्तं तत्रा
पि वृत्भूता कालीन शाब्दबोधस्यैव तादृशशाब्दसामान्यानिवर्तनिष्प्रबोधानिवर्तकतया तत्स्वरूपयोग्यताभावादेव प्रतिज्ञामात्रेऽल

क्षणासंभवादितिदिक् धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवस्य वाक्यार्थानुपातस्य न्यूनाविषयकत्वदूषणस्यानिष्कर्षमा
ह ॥ तावतां बोधानामन्यतमो योवच्छिन्न इति वक्तव्यमिति उद्देश्यानुमितिस्यन्यूनानातिरिक्तविषयकत्वदूषणे नैयायिकादिः अत्र कल्पे स्व सकलस्यावय
वाद्यघटकान्यायान्तर्गतत्वमेवार्थो न तु प्रकृतन्यायावयवत्वं तावद्बोधानिवर्तकसंशयानिवर्तकत्वदूषणवैयर्थ्यापत्तेः अवयवतन्त्रत्व
तावद्बोधान्यतमबोधजनकत्वविरहादित्युपपद्यते । हेतौ नैवं तद्धारणासंभवात् न च यत्रानुमितिस्तया पर्वतो वह्निमान्वह्नेरित्यादिको न्यय
स्तत्रोपनयवारकतया निवर्तकतादलं साधर्म्यकमनुमितिस्तया न्यायप्रयोगानभ्युपगमात् अन्यथा हेतुत्वं प्रमेयवह्निमानित्यादित्यादौ हेत्ववय
वातिव्याप्तेर्दुरुद्धरत्वापत्तेरिति ध्येयं यादृशतादृशत्वयोरननुगततयोरभावेन विशेषणतापर्यवसन्न लक्षणमाभिप्रेत्याह एवं चेति पक्षे इदं त
द्विशिष्टेन वा भेदस्योति अभेदसंबन्धेन गो विषयः बोधाविशिष्यवक्तव्यासमग्रेन्वयः तथा च तादात्म्येन गोप्रकारक इदं धर्मिकशाब्दसा
मान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वं समवयवघटकप्रकृतन्यायान्तर्गतत्वं प्रकृतन्यायावयवत्वं वा तादात्म्येन गोसाध्यक
पक्षकप्रतिज्ञात्वं वाच्यं । इदं धर्मिकतादृशगोप्रकारकत्वपर्यवसितं अन्यूनविषयकत्वं तु बोधस्य विशेषणं न देयमिति व्यर्थत्वात् धूमादालोक
वत्पर्वतो वह्निमान् धूमादित्यादिस्थलीयनिकतावेव हेत्ववयवलक्षणार्थं तस्य प्रवेशात् न चायं गौरिति प्रतिज्ञाजन्यबोधस्य तादृशशाब्दबोधे

सामान्यानिवर्तनियम्यमिदं धर्मिकत्वसंसर्गप्रतिनिवर्तकत्वादव्याप्तिरिति वाच्यं। एकत्वविषयकप्रतिज्ञाजन्यबोधमादायैव लक्षणसंभवा
दिति भावः॥ समवायेनेति॥ संयोगान्यवृत्तिनियामकसंबंधेनेत्यर्थः तेन कालिकसंबंधेन वह्निसाध्यके कालो वह्निमानिति प्रतिज्ञायामपि
वह्निमद्भेदबोधमादायैव निर्वाच्यत्वान्न न्यूनतेति ध्येयं वह्न्यादिति साध्यकेति पूर्वेणान्वयः एवमग्रेऽपि वह्निमद्भेदस्येति तथा पर्वतधर्मि
कवह्निमत्त्वप्रकारकत्वावच्छिन्नसामान्यानिवर्तनियम्यसंज्ञायानिवर्तकबोधजनकत्वमतं भविष्यत्संयोगादिसंबंधेन वह्निसाध्यकप्रतिज्ञात्वं वा
च्यं न च तादात्म्येन वह्निमत्साध्यकप्रतिज्ञायामतिव्याप्तिः तत्रापि पर्वतो वह्निमानित्याद्येव प्रतिज्ञान्तरीयत्वादिति वाच्यं प्रकृतन्यायावयव
र्थकेनमम मूलोक्तत्वस्य तेनैव तद्वारणादिति भावः पाककृतिसाध्यतायां चैत्रः पचति चैत्रः पाकाश्रय एवं प्रतिज्ञाद्वैविध्यात् बोधद्वयं दर्शयति
समवायेत्यादिना कृतिमत्त्वस्येति चैत्रः पचतीत्यत्र आख्यातार्थकृतेरेव चैत्रे प्रकारत्वात् कर्तृभेदस्येति चैत्रः पाकोपजनक — धर्मस्य कर्तुर्नैव चैत्रे
तादात्म्येन प्रकारत्वात् तथा च चैत्रधर्मिकोपपाककृतिप्रकारकोऽयं तादात्म्येन कर्तृप्रकारको बोधस्तदन्यतरानिवर्तनिवर्तनीयसंज्ञायानि
वर्तकान्यतरबोधजनकत्वमतं भाव्येव चैत्रपक्षकपाककृतिसाध्यकप्रतिज्ञात्वं वाच्यमिति भावः॥ अत्र चैत्रः पाककृतिमानित्येवं तत्तत्प्रयस्का
पि प्रतिज्ञात्वसंभवाद्बोधद्वयोपादानमसंगतं॥ न च तादृशवाक्यस्य साध्यतावच्छेदकीभूतपाककृतित्वेन साध्यानुपस्थापकत्वान्न पाककृति

साध्यकप्रतिज्ञात्वसंभवात् पाकपदस्य पाकसंबंधिनि लाक्षणिकत्वादिति वाच्यं॥ तादृप्येण साध्यानुपनाच्छापकत्वेपि तदयोग्यत्वसाध्यक
प्रतिज्ञात्वे बाधकाभावात् अन्यथा विशेषणतासंबंधेनेतरभेदस्य साध्यतायां नितरां भिन्नेति प्रतिज्ञायाः पक्षादिपदत्रितयानुपपत्तेः तत्रापी
तरपदस्यैतरप्रयोगिके लाक्षणिकत्वादिति चेत् न निर्णयं॥ पृथिव्यादावितरभेदस्य साध्यतायां चतुर्विधस्यैव प्रतिज्ञाजन्यबोधस्य संभवा
त् तत्रान्यतमस्यैवोपादेयात् इत्याह विशेषणतयेत्यादिना॥ इतरभेदवत्त्वस्येति पृथिवीतरेभ्यो भिद्यते इत्यत्र व्याख्यातार्थस्याश्रयतस्यैव
पृथिव्यां प्रकारत्वादिति भावः॥ इतरान्याभेदस्येति पृथिवीतरान्या इत्यत्र अभेदसंबंधेन पृथिव्यामितरान्यस्यैव प्रकारत्वादिति भावः इतरभे
दवत्त्वस्येति पृथिवी नेतराणीत्यत्र पृथिव्यामितरभेदस्यैव नञर्थस्य साक्षात्प्रकारत्वादिति भावः॥ इतरभिन्नाभेदस्येति पृथिवीतरभिन्ना
इति प्रतिज्ञाया अभिप्रेतेदं न यत् पृथिवीतरान्येति प्रागुक्तबोधेनैवास्य गतार्थत्वं तत्रान्यतमप्रकारेणैवान्यपदेनाभिन्नस्योपस्थापनात् इत्यत्
त्रिधा॥ अर्थभेदान्वितनिर्णार्थाश्रयस्य आश्रयत्वरूपेण पृथिव्यामभेदभानात् तावतैव वैलक्षण्यादिति भावः कस्यचिल्लक्षणमुपन्य
स्यतीति तावदिति शेषः [illegible] यत्साध्यकप्रतिज्ञाव्यक्तयो यादृशा यादृशबोधजनकतया संप्रदायसिद्धास्तावद्बोधेष्वर्थाः अत्रानिवर्तकत्वं
रम बोधस्य विशेषणहेतुतत्वाभावेति व्याप्तिवारणार्थं तत्रापि पृथिवीतरेभ्यो भिद्यत इति [illegible] प्रतिज्ञाजन्यबोधस्य तावद्बोधानिवर्तकत्व

नै

स्वसमानाकारानुमितिनिवर्तकत्वादव्याप्तिर्यतस्संशयपदप्रसक्तसाधर्म्यकं धूमादालोकवानित्यादिस्थलीयहेतोर्वरितार्थं निवर्तकत्वं धूमा
दालोकवानित्यादिप्रतिज्ञाजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्याकारकसंशयस्य निवर्तकत्वं धूमादिसत्त्वतदीयहेत्ववयवजन्यबोधस्या
पीत्यतो यावदिति तथा च यत्र यत्प्रतिज्ञाजन्यबोधानिवर्त्ययावत्संशयान्तर्गतसाध्यसंशयस्यैवानिवर्तकत्वं तन्न्यूनतावत्त्वं व्याप्तिरिति पृथिवी
तरेभ्यो भिद्यत इति प्रतिज्ञाजन्यबोधस्य तावद्बोधप्रत्येकबोधानिवर्तनिष्प्रयावदन्तर्गतायाः पृथिवी तरान्या इत्येवं स्वसमानाकारानु
मितेः प्रतिबन्धकत्वादव्याप्तिरतः संशयपदं पूर्ववत्प्रसक्तसाधर्म्यकं स्वसमानाकारस्यैव निश्चयस्य विरोधित्वादेतद्भेदादिसाध्यकन्य
लेतावद्बोधानिवर्त्यो न कोपि संशय इत्यव्याप्तिः [illegible] दित्युक्तं ननु यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्ताबोधकस्योपनयस्यासंभवा
च्चैत्रः पचतीत्यादिका प्रतिज्ञोपनास्तिपाककर्तृव्याप्यवानयमित्यादिवाक्यतः पचधात्वर्थलक्षणाया पाकसंबन्धाभिन्नकृतित्वेनैव सा
ध्यस्यापरिच्छित्तेस्तत्र मूलोक्तानुमित्यन्यूनविषयकत्वस्य व्युत्पादनं प्रागुक्तं विफलमत आह । चैत्रः पचतीत्यादि चैत्रः पचतीत्यत्र पक्षत्वव्या
प्य चैत्रत्ववानयमित्याकारकोपनयसंभवादाह घटो नेतरो यो नीति विषयितेति पचतीत्यत्रातिङर्थकृतौ पाकस्य विषयितासंसर्गः तथा च नि
तरीयत्वेन ङर्थभेदे इतरस्यानुयोगित्वं संबन्ध इति भावः यथोपदर्शितेति यद्रूपेण साध्यं प्रतिज्ञायामुपदर्शितं तदवच्छिन्नसाध्ये

र्थः॥ उपनेयत्वात् उपनयेन प्रदर्शनीयत्वात्। अन्यथा वह्निहेतुत्वेन साध्यतायां तेजोव्याप्यवत्वेनापि पक्षस्योपनयप्रसंगादिति भावः सुव
चटवेति पदृये च साध्यत्वं तदवच्छिन्नव्याप्यस्यैव तथात्वेन बोधयतु वाक्यत्वादिति भावः योयमत्रेः पचतीत्यादिक्रमेणोदाहरणस्मि
स्तवादुपनयपर्यंतानुसरणं ननु तथापि मणिकारादीनां नव्यानां मते पाककृति व्याप्यवानयमित्युपनयस्यासंगतिरेव यादृशोभ पाक
कृतित्वादिना साध्यत्वं तदवच्छिन्नव्याप्यत्वस्यानुपन्यसापनादत आह। नव्यानामिति तद्व्याप्यहेतुमानयमिति व्याप्यस्याभेद एव भास
ते। ननु व्याप्तिमत्वं अनुमितावुपयुक्तं चेत् तदेवेतत्प्रकारेतरमाह। तद्वान्वयीति न स्मृतक्रमेणोपनये पूर्वोपस्थापितत्वाविशेषात् पक्षादेनपि
तदवच्छेदेन पयानर्थक्यं स्यादत आह। योग्यतेति। प्रमेयं वाच्यमभिधेयत्वादित्यादिस्थले पक्षपयामनोपि योग्यतास्तवादोदिपदमुक्तं
तेन तात्पर्यपुरस्कृतः तथा तदवच्छेदेन साध्यस्येति प्रदर्मेतद्व्याप्यस्येति द्वितीये अत्र पाककृति व्याप्यचैत्रत्ववानयमित्यादुपनयेपि न
कृति कृतिपदेन लक्षणया साध्यतावच्छेदकीभूत पाककृतित्वप्रकारेण साध्यस्योपस्थितिसंभवात्तत्र लक्षणाया आवश्यकत्वात् अ
न्यथा नामार्थस्य कृतेर्धात्वर्थव्याप्त्योऽभेदेनान्वयस्यासंभवात्। आकपदस्य तात्पर्यग्राहकतयैवोपयोगात्। न च तथापि चैत्रत्वादिहे
तौ व्याप्यस्याभेदेनान्वयात्तत्र व्योम्नि मताल्लाभः तद्वापि तद्वानयमित्युपनयादनुमितावुपयुक्तस्य पक्षे हेतुमत्तस्यालाभेन तुल्यत्वा

त्पक्षे हेतुमद्भेदस्यैव तेन बोधनादिति तु चि॰ ह॰। तादात्म्येन वह्निमतः साध्यतायामेव पर्वतो वह्निमानित्यादिका। प्रतिज्ञा वह्नेः साध्यता
यां तु पर्वतस्तथेत्यादिरूपैव सा तथा च यादृशो यादृश विपक्षोऽपि नापि मूलोक्तान्यूनानतिरिक्तविषयकत्वेनैव सामञ्जस्यमिति वेदं के
प्राचीनमतं सयुक्तिकमुपन्यस्यति केचित्त्विति विप्रतिपत्तिवाक्यस्य निर्विषयकत्वाद्वह्निमदादेर्नैतत्कोटित्वसंभवः। शाब्दसंशयस्या
प्रसिद्धौ तेन व्यापारानुबंधिनोपितकोटिकस्यासंभवादत उक्तं। तदधीनसंशये चेति जिज्ञासितत्वादिति तादृशसंशयाधीनजिज्ञा
सा विषयत्वादित्यर्थः ननु वह्निरिति साधयितुमुचितमिति पूर्वेणान्वयः न च विप्रतिपत्तिवाक्याद्वह्निमत इव वह्नेरप्युपस्थितत्वाद्वह्निम
द्भेदकोटिकसंशयोपगमे वह्नेरपि जिज्ञासा तत्र संभवतीति वाच्यं विप्रतिपत्तिवाक्यस्य धर्मावच्छिन्नविषयताकबोधजनकत्वे त
दवच्छिन्नस्यैव प्रतिज्ञायामपि विषयतानियमात् अन्यथा वह्निसामग्रीमान्न वेति विप्रतिपत्तिस्थलेपि वह्नेः साध्यत्वप्रसंगात्।।
अतएवाह तौ तु सैव प्रतिज्ञेति मूले वक्ष्यतीति भावः ननु वह्निमः साध्यत्वे वह्नेरुपनयप्रदर्शनाविरोध इत्यत आह तमपि पापिसहजन्ना
ह।। तथा चेति।। प्राचीननययोर्मतभेदे न प्रकारद्वयं अर्थातरत्वादिति वह्निव्याप्युपनयस्य वह्निमद्व्याप्यनुपयुक्तत्वादिति भावः प्रा
हुरिति।। पादद्वा पक्षे यादि विकक्षावि नापि मूलोक्तसामञ्जस्यरवप्रकर्षः ननु यत्र सभाक्षोभादिवशात्प्रतिज्ञाद्यबोधो नज्ञा तत्र

त्राव्याप्तिरत आह ॥ यत्र चेति तादृशाकांक्षेति तादृशबोधानुकूलाकांक्षेत्यर्थः योग्यतादिस्यादिना तात्पर्यादिः परिग्रहः नन्वेवं ह्रदादौ
वह्निमान्नियादिप्रतिज्ञायामव्याप्तिः योग्यताविरहादिति चेन्न्यायांतर्गतप्रतिज्ञामात्रस्य लक्ष्यतया तत्राव्याप्तेरदोषत्वादिति
भावः। नन्वेवं शाब्दवाक्यपदयोर्वैयर्थ्यं योग्यताज्ञानादेस्तादृशबोधजनकत्वेप्याकांक्षादिमत्त्वविरहेण वारणादत आह। तत्
त्वेऽभश्चेति यथा चोक्तपदद्वयस्यानिच्छ्यादेव स्वरूपयोग्यताल्लाभात् न तयोर्वैयर्थ्यमिति भावः समानविषयतेति अन्यूनानति
रिक्तपदसाकांक्षोद्देश्यानुमितिविषयकपदेनोद्देश्यानुमितेर्विषयो विषयो यस्येति व्युत्पत्त्या तत्समानविषयकत्वलाभादिति
भावः। अत्र कल्पे क्रमं तस्यावयववाच्यत्वं न्यायांतर्गतत्वं नार्थः तथा सति वह्निव्याप्यधूमवान्त्वजस्त्वादूपवत्त्वादित्यादौ तेजस्त्वाज्ञा।
प्यरूपवत्त्वहेतुकन्याये तेजस्त्वादिसत्त्वस्य दुर्वारतापत्तेः किंतु न्यायावयवत्वमेवेत्याशयेन प्राचीनव्याख्यातस्यापि ससत्तस्या
र्थो न्यायावयवत्वरूपः पुनरुक्तसमानविषयकात्स्यफलमाह व्यतिरेकिणीति योयो निर्वह्निः स निर्धूमो यथा ह्रद इत्यनुमित्युद
देश्यस्य लिङ्गविषयकत्वविरहादेव व्युदासायेति च किं पीत्युक्तं तथा च योयो धूमवान् स वह्निमान् यथा महानसमित्युदा
हरणस्य निर्वह्नित्वरूपलिङ्गविषयकत्वमस्त्येवेति भावः पक्षविषयकत्वे सत्यपक्षविषयत्वं व्यापकत्वपर्यन्तस्यार्थो विवक्षणीयः।

दी

यस्य व्याप्तिमभिधाय यथा पर्वतादावितीति दृष्टान्तमनुपेक्ष्य दृष्टान्ततामाह ॥ यथेति। दृष्टान्तवतश्च उदाहरणस्योदाहरणेऽन्वयः तथा
च प्रतियोगिविधयैव निरुक्तोदाहरणस्य पक्षविषयकत्वात् पक्षाविशेष्यकत्वं वाच्यमिति भावः दृष्टान्तमनन्तर्भाव्यैवोदाह
रणाकारीन निरुक्तमतेऽपि पक्षविशेष्यकत्वपर्यन्तप्रवेशार्थं तस्यानन्तरमाह। ह्रदवृत्तीत्यादि ह्रदो निर्धूम इत्यादावुक्तमनुपउ
ते तथा च ह्रदो निर्धूमो महानसादावृत्तिधर्मत्वान्यतरादित्यादौ यो यो धूमवान् स ह्रदावृत्तिधर्मवानित्युदाहरणस्यापि लिंगविष
यकस्य ह्रदग्राहकपक्षविषयकत्वात् पक्षाविशेष्यकत्वप्रवेशे तद्वारणायावश्यक इति भावः॥ पक्षाविशेष्यकेति तन्मुख्यविशे
ष्यके सत्यर्थः॥ ननु वृक्षः तत्कपिसंयोगी तदन्यतत्कपिविभागरहितत्वादित्यादिस्थले यत्र यत्र तत्कपिसंयोगवान्स तत्कपिवि
भागवानिति व्याप्तिवैकल्पदाहरणस्य तत्कपिसंयोगवत्प्रकारकत्वेऽपि पक्षीभूतवृक्षविशेष्यकज्ञानजनकत्वात्तत्रातिव्याप्तिरिति
वाच्यं॥ कथितसाध्यसाधनयोः केवलान्वयितया व्यतिरेकव्याप्त्यसम्भवेनोदाहरणस्यैव तादृशस्यासत्त्वात्तत्रातिव्या
प्त्ययोगादिति भावः॥ उपनयेति। यद्यपि निगमनस्यापि पक्षविशेष्यकज्ञानजनकत्वादुपनयमात्रातिव्याप्तिरयुक्ता तस्य
वह्निमानित्यादौ वह्निमत्त्वेन पर्वतस्यैव विशेष्यत्वात्। न च पक्षतावच्छेदकधर्मविशिष्टविशेष्यकत्वप्रवेशेनैव तद्वारणसम्भवात्

पनयपर्यंतानुसरणमिति वाच्यं ॥ हेतुत्वं प्रमेयत्वेऽप्यतादृशत्वादिहेतुत्वपर्यवस्यापि वारणीयत्वसंभवादिदमपि न्यूनतानुधायात् ॥ तथापि
निगमनादौ न सर्वत्रास्ति व्याप्तिसंभवः ॥ तस्मात् क्वचित् तद्वाक्यादावभावात् उपनये तु सर्वत्रैव पक्षधर्मिकज्ञानजनकत्वात् तथेति तन्मात्रो
क्तिरिति भावः ॥ ननु तन्मात्रस्यैव लिंगत्वात् सामान्यतः तद्विषयकत्वसंभव उक्तिक्रमतः प्रकृतपदं प्रक्षिप्य शंकते यद्यपीति ॥ ननु लिं
गतावच्छेदकरूपेण यावल्लिंगाविज्ञोपपादकत्वं तदभावो वाच्यः ॥ तथा चोक्तप्रतिज्ञायाः पृथिवीत्वप्रकारेण पृथिवीत्वस्याप्रवेशान्न व्याप्तिः वि
ज्ञोपपादकत्वप्रवेशाच्चोक्तस्थले एवतादात्म्येन पृथिव्याः साधनतेऽपि नात्र संगच्छत आह ॥ गंधवतीत्यादि तथा चोक्तस्थले अव्या
पकमिति लिंगतावच्छेदकीभूतं यद्गंधत्वं तद्रूपेणैव लिंगस्य प्रतिज्ञायां प्रविष्टत्वादिति भावः ॥ ननु क्वचित् न्यायासंभवात् प्रति
ज्ञैव नास्ति कुत्रा व्याप्तिरित्यत्राह कथं निराचष्टे न चैतत् ॥ वाक्यमित्यत्रोन्वयः ॥ गंधववान्वयेति बाधपदत्वप्रकारेणाभेदान्वयबोधस्या
योग्यादिरर्थः ॥ उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्यात् दंडवान् न दण्डवानित्यादिवत् शाब्दबुद्धेराकांक्षाभावादिति भावः ॥ साध्या
भावेति ॥ तथा च तदभावव्यापकीभूतस्य गंधाभावस्याभाववती इयमित्येवोपनयवोधी स्मृतो न लिंगाकांक्षाभावमिति भावः ॥ अ
तएवेति ॥ यद्रूपेण हेतुत्वं तदवच्छिन्नाभावाभाववत्प्रकारेणैव व्यतिरेक्युपनयस्य हेतुमत्त्वबोधकत्वादेवेत्यर्थः ॥ नियमनेयमिति यप्र

प्युक्तप्रयोगा न व्याप्यवह्निमत्त्वस्य हेतोः पक्षधर्मतावगमकत्वं तथापि पक्षधर्मताबोधमात्रमुपनयस्य फलं व्याप्तिबोधस्योदाहरणा
देनैव कृतत्वादतो व्याप्तिबोधार्थं नितत्रपदान्तरप्रक्षेप इति प्राचामाशयः। ननु व्याप्तस्य हेतोः पक्षसत्त्वं न वेत्याकांक्षायामान्वयव्याप्ति
व्यस्योपनयस्यावश्यहेतुतावच्छेदकावह्निमत्त्वव्याप्यवह्निमत्त्वहेतुमत्तया पक्षबोधकत्वं अन्यथा तादृशाकांक्षाया अनिवृत्तेर
त आह। यद्वेति। शाब्दीति। विशेषणीतया वह्निमत्त्वेऽप्यर्थः। तद्वत्तु प्रकृते गंधविशिष्टे व्यतिरेकव्याप्तिविशिष्टगंधवद्वह्निमत्त्वस्यैवा
न्वयेन व्याप्तस्य संभवादिति भावः। प्राञ्चः खलेकपोतन्यायेनैव सर्वत्रान्वयबोधस्योपगमात् तन्मते दंडवान् तत्र दंडवान्नियतः अपि
तत्र विशिष्टे दंडावच्छिन्नस्य न दंडवृत्त्यन्वयः। किंतु दंडवति दंडः। तन्न तत्र विशेष्ये विशेषणमिति न्यायेन युगपदेव भासत इत्युभ
वन्वये तन्मते निराकांक्षाभिप्रायेण यद्वेत्युक्तम्। पक्षाविशेषणत्वेनेति इदं तु निर्गलितं किंचित्पक्षाविशेषणत्वेनेति इदं वाचि
ति किंचित्पक्षाविशेषणत्वे नाति गा विषयकत्वं तावत्पक्षाविशेषणतान्यानि गा विषयतावाभावः प्रागुक्तदोषतादवस्थ्यात्। गंध
वतीतरेभ्यो भिद्यत इति प्रतिज्ञायामपि पक्षाविशेषणतान्य गंधवत्त्वे विशेष्यतानूपस्यैव गंधात्मकहेतुविषयत्वस्य समानकाला
ताद्वयोरिव विशेष्यताद्वयोर्मिथो निरूप्यनिरूपकभावेन पक्षानिष्ठविषयतानिरूपितालिंगविषयताभावस्यापि प्रकृतेऽक्षतत्वात्।

न च पक्षविशेषणताशिवेत्तत्र यद्धेतुतावच्छेदकधर्मावच्छिन्नविषयत्वं तदभावोऽर्थः॥ प्रोक्तप्रतिज्ञायायां तु गन्धानिष्ठस्य गन्धत्वांशे विशेष्यत्वस्य
गन्धत्वानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यं॥ सुवर्णं गन्धवतीतरेभ्यो भिद्यते गन्धादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात्। तत्र सौवर्णभौ
गन्धत्वावच्छिन्नस्याविशेष्यत्वात्। नापि प्रकृतपक्षाविशेष्यत्वानन्तर्गतालिङ्गविषयत्वाभावोऽर्थः। तथा सति प्रमेयत्वनिष्ठहेतुत्ववाच्यं। प्र
मेयत्वादित्यादौ हेतावति व्याप्तिप्रसङ्गात्। एवं दाधिकव्यतिरेकादि प्रतिज्ञायां वक्ष्यमाणाव्याप्तेरसंगत्यापत्तेः। तत्रापि पक्षविषयतानन्तर्ग
तत्वे सति साध्यविषयतानन्तर्गतयालिङ्गविषयत्वं तदसत्त्वेनाव्याप्त्यसंभवात्। साध्याविशेषणत्वेन लिङ्गविषयत्वस्याव्युत्पन्नत्वेनैव
निर्वाच्यत्वात्॥ अन्यथायं वह्निसामानाधिकरण्यवान् धूमादित्यादौ वा अव्याप्तितादवस्थ्यादिति संक्षेपः॥ पक्षेति॥ अव्यापकनियमे
न्वयः। पक्षत्वादि तथा चोक्तप्रतिज्ञाद्वये पक्षसाध्ययोरविशेषणतयैव लिङ्गविषयत्वान्नाव्याप्तिरिति भावः॥ दृष्टान्तव्यतिरेकप्रतिज्ञायां वि
शेष्यत्वेनैव लिङ्गस्य भानात्। पक्षसाध्ययोरविशेषणत्वे न यालिङ्गविषयत्वं तदभाववत्त्वादव्याप्तिरित्यर्थः॥ न चात्र समवायेन दण्डो
हेतुत्वात्। तदन्वयानुरोधादस्या अवयविलिङ्गं निर्दध्येव साध्यवत्प्रतिज्ञयावबोध्यते अन्यथा भागासिद्धिप्रसङ्गात्। तथा च पक्षसाध्य
योरविशेषणत्वेनालिङ्गतावच्छेदकावच्छिन्नयावल्लिङ्गविषयकत्वविवक्षायैव नात्राव्याप्तिरिति वाच्यं तादात्म्यसंबन्धेन दण्डो हेतुता

जगदीशीय
१९

तायां तथाप्यप्रतीकाशादिति भावः॥ व्यतिरेकीपक्षप्रीतज्ञायामव्याप्तिमुक्ता केवलान्वयिपक्षिकायां तामाह प्रमेयत्वमिति॥ नच केव
लान्वयिसाध्यके विवादाभावात्प्रतिज्ञैव नास्ति कुतो व्याप्तिरिति वाच्यं॥ केवलान्वयिसाध्यकपक्षायां विवादसंभवादिति भावः॥ ननु ८
नीलधूमत्वेनेव प्रमेयत्वेन हेतुत्वस्यापि नसमन्यायः। व्यर्थविशेषणत्वादिप्रयत्ना तस्यैव व्याप्यतावच्छेदकत्वादिति कुतस्तत्र प्र
तिज्ञायामव्याप्तिरत आह॥ गोत्वाभाववदिति॥ अत्र च गोत्वाभावस्य स्वरूपसंबंधेन सत्वान्न पक्षधर्मत्वहानिः ननु पक्षसाध्ययो र
विशेषणत्वेन यत्लिंगप्रकाशकत्वं तदभावो वाच्यः तथा चोक्तप्रतिज्ञात्रयेपि लिंगस्य प्रकाशकत्वाभावान्नाव्याप्तिरत आह॥ अतिव्या
पकं चेति सर्वत्रैवोपनयो लिंगस्य पक्षविशेषणतयैव भानादतिव्याप्तिरित्यर्थः॥ नचोपनयमात्रस्यैव हेतुव्यापकत्वोपक्षाविशे
षणत्वेन लिंगप्रकाशकत्वान्नातिव्याप्तिरिति वाच्यं। साक्षात्प्रयोजकसाध्यासमानपक्षविशेषणतया भातस्यामुपनये पक्षविशे
षणत्वात्। अन्यथा धूमसधर्मा पर्वतो वह्निमान् धूमादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र धूमस्य पक्षे साक्षादविशेषण
त्वात्॥ साध्यवदन्यावृत्तित्वाद्व्याप्तेः लिंगघटितत्वात्तदुपनयेति प्रसक्तेस्तथाप्युपादानेति भावः। तथापि यद्गंधवती
तरेभ्यो भिद्यते गंधादित्यादौ पर्वतः सामग्रीमानुवह्नेरित्यादौ च प्रतिज्ञायामस्य ग्रहाय मनप्रच्छेदकद्वयोपादाने अत्र चयत्र बाधवत्ता

राम
१९

पवच्छेदेन साध्यसिद्धेरुद्देश्यतायां गंधादिके हेतुः तत्र सप्रतिज्ञायां अव्याप्तिवारणार्थं यद्रूपेण पक्षत्वं तन्निष्ठावच्छेदकतादेनाव्यवग-
हितायां कारान्ते वक्ष्यमाणो बोध्यः निरुक्तावच्छिन्नहिताबहिर्भूतं यद्विषयत्वं तदभावस्योक्तौ प्रागुक्तस्य पक्षादिविशेष्यकत्वदलस्य वैयर्थ्यं
स्यादतदुक्तं ॥ लिंगविषयत्वस्येति अखंडाभावघटकतया च न लिंगलिंगवदंशस्य वैयर्थ्यमिति भावः ॥ अत्राधियतावच्छेदकत्वं साध्य
कप्रतिज्ञाघटकीभूतं यादृशयादृशविषयताकबोधजनकत्वं संप्रदायसिद्धं । तादृशविषयताबहिर्भूतलिंगविषयत्वाभावः फलि
तार्थो ग्राह्यः तेन गंधवतीतरेभ्यो भिद्यते गंधादित्यादौ प्रतिज्ञायाः पक्षे साध्यवैशिष्ट्यावगाहिज्ञानजनकतया तादृशविषयताबहि
र्भूतलिंगविषयिताकत्वस्य तत्र सत्वेपि नाव्याप्तिरिति ध्येयं ॥ ननूक्तविषयितायां वह्निभिन्नत्वे न तद्भिन्नत्वं तादृशी नतरां लिंगविष
यतास्मादायोक्ताव्याप्तितादवस्थ्यात् । अत एव न तादृशविषयिता व्यापकत्वमपि तद्बहिर्भावः प्रतिज्ञायां स्वरूपसंबंधात्मनो लिंग
विषयत्वस्य भेदादुक्तदोषतादवस्थ्यात् तदर्थमाह ॥ वस्तुतस्त्विति ॥ ननु लिंगगतं व्याप्यत्वं तथा च व्याप्यपर्वतो वह्निमान् नु धूमादित्यत्र प्रति
ज्ञायामव्याप्तिरत आह ॥ तथा चेति ॥ तच्चेति तादृशव्याप्तिविषयकत्वं चेत्यर्थः ॥ हेतुभूतेति । हेतुभूतो योऽभावस्तत्प्रतियोगितावच्छ
च्छेदकं पक्षे त्वभावत्वं तदवच्छिन्नेत्यर्थः ॥ हेतोः साध्याभावव्यापकाभावप्रतियोगिताविगाहितामित्युक्तौ हृदो निर्धूमो निर्वह्नित्वा

दिग्धादौ घोषो निर्धूमत्वाभाववान् सवह्निमानिति व्यतिरेकमुदाहरणे ऽतिव्याप्तिस्स्यान्निरुक्तव्याप्त्यविषयत्वादतो वक्ष्यति:। तेन तत्रापि
हेतुभूतयावन्निर्वह्निवत्तत्प्रतियोगितावच्छेदकीभूतवह्नित्वावच्छिन्ने साध्याभावव्यापकत्वान्नातिव्याप्तिः॥ इदमुपलक्षणं॥ साध्याभावोऽपि सा
ध्यप्रतियोगितावच्छेदकावच्छिन्नत्वेनोपादेयः तेन धूमाभावाभावपक्षे न साध्याभावाप्रवेशोऽपि नोक्तस्थलोदाहरणेऽतिप्रसंगः॥ वस्तुतो यावत्
व्याप्तिविषयिताः प्रकृतसाध्यानुमित्युपयिकाः प्रत्येकं तद्घटितत्वाभावकूटप्रवेशे तेन नानाविधानां व्याप्तिविषयितानां अनुगतधर्मा
भावेऽपि नोपपत्त्यादिव्याप्तिरिति ध्येयं। प्रकृतहेतुतावच्छेदकस्य फलमाह॥ द्रव्यत्वव्याप्येति। अत्र हेतुतावच्छेदकीभूतं यद्गुणत्वं। तदवच्छिन्ने
द्रव्यत्वव्याप्यत्वाभावान्नाव्याप्तिरिति भावः॥ द्रव्यत्वव्याप्यसंयोगवानयमित्यादौ विवादास्पदसंयोगाभावात्संयोगवत्त्वमुक्तं। प्रकृतसाध्यताव
च्छेदकस्य फलमाह॥ गुणव्याप्येति। तथा च स्पर्शत्वावच्छिन्ने यत्र सकृत्साध्ये तद्व्याप्यत्वाभावान्नाव्याप्तिरिति। नन्वेवं निरुक्तव्याप्तिवि
षयतानामन्यतमदले नैव व्यतिरेकमुदाहरणस्याव्याप्तिवारणसंभवात्पक्षविशेष्यकधर्मसमानविषयकत्वदलं व्यर्थमिति तत्सार्थक्यागमू
लस्य तात्पर्यमाह॥ अन्यत्रेति॥ ननु तद्दलत्यागे धूमादिसाध्यादिहेतुकपक्षेऽतिव्याप्तिरत आह॥ हेतुमानिति॥ वाच्यापीति तत्र महेतुवपक्षस्य
पक्षविशेष्यकत्वानुमानकत्वसमानविषयकत्वदलेन तत् - वारणायोगादिति भावः॥ ननु पक्षवृत्त्यतात्पर्यतो वह्निमान्यो धूमादित्यादिप्र

तिशेषाणामव्याप्तिरत आह ॥ हेतुमत्यस्य वैतिन ननु हेतुमत्पक्षकस्य प्रमेयत्वादित्यादिहेतोः पक्षविशेष्यकशाब्दजनकत्वे तस्यैव हेतुमत्यन्यत्
विशेषणं वाच्यं ॥ तत्रैव चापि किं मानमतः तत्र प्रमाणमाह ॥ संख्याभिन्नेति तथा चोक्तानियमवशादेव प्रकृतहेतोः पक्षविशेष्यकशाब्द
जनकत्वमावश्यकमिति भावः ॥ यत्तु ननु सुबर्थमात्रस्य प्रकृत्यर्थविशेषणतयैव भानात् प्रमेयत्वादित्यादिहेतुवाक्येन मेयत्वे हेतुता
वह्निमत्त्वेव बोधजननात् पक्षविशेष्यकत्वस्य हेतुत्वे नैव तद्वारणं संभवतीत्यतः संख्यातिरिक्तेति तत्तुच्छं तादृशशंकायाः तथापि तावता पर्वतो वह्नि
मान् पर्वतादित्यादौ हेत्ववयवेतिव्याप्तितादवस्थ्यात् तस्याप्युक्तक्रमेण कर्तृकाया पक्षविशेष्यकबोधजनकत्वसंभवादिति ध्येयं ॥ सु
बर्थसंख्यायाः प्रकृत्यर्थविशेषणतयैवान्वयात् तत्र व्यभिचारवारणार्थमतिरिक्तेति ॥ नादीत्यादौ तिङर्थवर्तमानत्वस्य प्रकृतेत्यादौ च
तिङर्थकार्यत्वादेः प्रकृत्यर्थत्वविशेषणतयैव भानादुभयत्र व्यर्थत्वमपहाय सुबर्थेत्युक्तं ननु चैत्रो गच्छतीत्यादौ सुबर्थस्य संबोध्यत्वादेः प्रकृ
त्यर्थे चैत्रादौ विशेषणतया नैव भानादुक्तानियमे व्यभिचार इत्यत आह । प्रातिपदिकत्वादिभेदेन तादात्म्यातिरिक्तसंबंधेन वक्ष्यमाण
त्वादिति अन्यथा घटोऽयं पचतीत्यादितोऽपि घटीयत्वेन रूपस्य बोधनीयत्वेनापाकस्य बोधापत्तेः तथा च हेतुत्वमभिधेयं । विधे
तेवा प्रमेयत्वादित्यादौ हेतुत्वसंबंधेन प्रमेयत्वस्य नामार्थोपस्थाप्यत्वाभिधेयत्वे धातूपस्थाप्यभेदेवान्वयासंभवादवयवहेत्ववयवस्य हे

तुल्यरूपपक्षादिवैशिष्ट्यकान्वयबोधजनकत्वमितिभावः॥ ननु कर्मत्वादिरूपभेदस्य संसर्गेण नामार्थस्यान्वयबोधे नामकर्मत्वाद्यर्थविभक्त्यंतस
स्य तं प्रत्यादेवोक्तातिप्रसंगस्य वारणसंभवात्॥ पंचम्यर्थहेतुत्वादिविशिष्टस्य प्रमेयत्वादेः हेतुत्वसंबंधेनैव अभिधेयत्वादावन्वयेबाध
काभाव इत्यत आह॥ चैत्रस्येत्यादि तथाच चैत्रस्येदं मैत्रस्वत्वाभाववदित्यन्वयबोधे विभक्त्यर्थस्य स्वत्वादेर्नामार्थे क्रियोष्यतया भान
स्यावश्यकत्वं नहि स्वत्वान्वितमैत्रस्यैव स्वत्वसंबंधेनाभावः॥ तत्र च नामार्थप्रतीयमानस्वत्वादेः स्वत्वेन व्यापकतया तत्संबंधावच्छिन्नप्रतियो
गिताकाभावस्यासंभवात्॥ स्ववत्स्वत्वविशिष्टमैत्रस्य संयोगादिसंबंधेनाभाववत्त्वप्रतीत्यैतेदं चैत्रस्येत्यस्यापि प्रसंगात् चैत्र
स्वामिकघटेपि संयोगादिसंबंधेन चैत्रस्याभाववत्त्वादितिभावः॥ ननु चैत्रासंतताभावस्य बोधने चैत्रात्मक नाम्नः प्रयत्नात्तत्तत्रम
तः संयोगादिना चैत्रासंतताभावस्य चैत्रीयधनेस्त्वेपि नेदं चैत्रस्येति न प्रयोग इत्यत आह॥ मैत्रस्येदं न चैत्रस्येति तथा चोक्तस्थले
व चैत्रासंताभावबोधस्वीकारे प्रथमांततया व्युत्पत्तौ व्यभिचार इत्यवश्यं चैत्रस्वत्वाभाव एव बोध्य इति यः। अन्यथोक्त क्रमेणापातिप्रसंगादि
तिभावः॥ ननु नेदं चैत्रस्येत्यादौ षष्ठ्या प्रतियोगित्वस्य नञा चाभिन्नस्याभिधानात् चैत्राद्धिनेस्वत्वसंबंधेन चैत्रान्यदेव प्रतीयत इति
यथा ब्रूयात्तदाप्याह द्वयोरिदमिति नेदं चैत्रस्येत्यनुपपन्नीयं॥ तथा चोक्त क्रमेण चैत्रमैत्रयोरिदं न चैत्रस्येति वाक्यस्यापि योग्य

तापत्तिः उभयस्वामिकस्य सुतरां चैत्राभिन्नस्वामिकत्वे तदसत्त्वाद् अयोग्यतार्थं चैत्रस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति
भावः ॥ उक्तक्रमेण शाब्दबुद्ध्युपगमे अयोग्यवाक्यस्य योग्यतापत्तिं बाधकमुक्त्वा योग्यस्यापि वाक्यस्यायोग्यतापत्तिं बाधकमाह ॥ ने
दमेकस्यापीति ॥ अत्रैकपदं प्रातिपदिकसामान्यपरं यथा च प्रातिपदिकार्थस्य स्वत्वसंबन्धेन धनादावसत्त्वान्नेदमेकस्यापीति वाक्यमयोग्यं स्या
दतस्तद्योग्यतार्थं प्रातिपदिकार्थस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः ॥ नन्वेतावतापि प्रत्ययार्थस्य प्रकृत्यर्थविशेष्यतया भा
नसिद्धावपि प्रत्ययार्थस्य हेतुत्वस्य तथात्वं न स्यात् अत आह ॥ इत्यादाविति ॥ तथा च पर्वतो वह्निमान् धूमात् न जलादित्यादौ वह्न्यादेर्जलादि
ज्ञाप्यत्वाभावबोधानुरोधादेव तथात्वमिति भावः ॥ चैत्रादिसंबन्धाभावबोधस्येति पाठः ॥ चैत्रादिसंबन्धाभावस्येति पाठे तु चैत्रादिसंब
धस्य स्वामित्वात्तदभावस्य च बोधो ग्राह्यः ॥ वस्तुतश्चैत्रस्येदं न किं तु मैत्रस्येति योजनया चैत्रादिसंबन्धाभावस्यैव बोधः प्रकाशित इति
नानुपपत्तिस्तत्रापि न नु नेदं चैत्रस्येत्यादौ स्वत्वान्वितचैत्रस्यैव स्वत्वसंबन्धेनाभावः ॥ नञ्बोध्यते इत्यस्मिन् नियामकसंबन्धस्य प्रतियोगि
तावच्छेदकप्रवादस्य निर्युक्तिकत्वादतः स्वत्वस्येव चैत्रस्यापि तादात्म्याभावो बोधयितुमशक्य इत्याह ॥ चैत्रो न पत्नीत्यादितया च विभक्त्यर्थसत्ता
भावबोधनेन उक्तसंसर्गानपेक्षणात् अस्माकं तु मते चैत्रस्य स्वत्वाभावबोधो न दुर्घटः प्रातिपदिकार्थस्य चैत्रादेः स्वत्वादिसंबन्धेन धनादा

वभावेऽस्य बोधो न संभवति नामार्थस्य अयुतताभावबोधने नञा अनुयोगिनि सप्तमी सापेक्षत्वादन्यथाप्यतः पटो नेत्यादावपि घटादेरयुतता
भावप्रतीतिप्रसङ्गादिति निगर्वः॥ हेतुविषयकेत्यादि हेतुविषयकज्ञानजनकत्वव्याप्यपदवयवतावच्छेदकं हेतुत्वमुपनयत्वात्मकमन्यत्वे
सतीत्यर्थः॥ हेतुविषयकत्वस्य सामानाधिकरण्यप्रतिज्ञात्वमादाय संभवः॥ स्यादतो व्याप्यपदं हेतुविषयकत्वस्य सामानाधिकरण्येन
प्रतिज्ञात्वमादाय संभवः॥ स्यादतो व्याप्यपदं हेतुविषयकत्वस्य व्याप्यतत्त्वप्रतिज्ञात्वमादायाव्याप्तेर्वारणाय अवयवतावच्छेदके
ति उदाहरणस्य हेतुविषयकत्वानियतत्वान्न दादायोदाहरणेति व्याप्तिरतउक्तमुदाहरणान्येति उदासीनत्वान्न पायन्यावयवेति अत्र
हेतुविषयकत्वमवच्छेद्यं प्रकृतहेतुविषयकत्वं वाच्यं॥ अन्यथा वस्तुमात्रस्यैव हेतुत्वसंभवात्प्रतिज्ञाया असंभवापत्तेः तथा च सर्वथा
नपास्योपनयत्वादेनापि धूमादिप्रकृतहेतुविषयकज्ञानजनकत्वानियतत्वात् तत्रातिव्याप्तिः यदि च सर्वसाधारणमुपनयत्वाद्
कं नास्त्येवावयवविभाजकं परं तु प्रकृतसाध्यहेतुसाधनीयव्याप्त्यादिना तथेति विभाव्यते तदा प्रतिज्ञात्वमपि तद्धेतुकत्वसाध्यकत्वाद
नैव निर्वाच्यं। तथा च यत्साध्यकहेतुके प्रतिज्ञायां हेतुविषयकत्वं नैयत्यत्वात् तत्राव्याप्तिनिस्तारः कोऽपि पदिप्रकृतकस्यचित् जिज्ञासा
नुपधायकप्रतिज्ञायामव्याप्तेराह॥ तच्चोपयतेति॥ योग्यतात्यन्त्रप्रकृतहेत्ववयवप्राकट्यतिष्ठरूपा ग्राह्या नेनु प्रतिज्ञैकदेशादेनापि

तादृशावाक्यत्वात्तत्रातिव्याप्तिरत आह ॥ व्याप्यावयवत्वमिति ॥ प्रकृते ह्रदादि गंधवती तत्तेभ्यो भिद्यते गंधादिमत्त्वादित्यादि स्फुलीयप्रतिज्ञाया
मव्याप्तिमात्रावयत्वाह ॥ पूर्वोपदर्शितेति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयता बहिर्भावेनायात् लिङ्गविषयतदभावात् कमि
त्यर्थः ॥ तेन न्यायोपनयादेर्व्युदासः ॥ भावहेतुकोदाहरणस्य लिङ्गविषयकत्वदले नैव वारणसंभवादाह ॥ अभावहेतुकइति ॥ त
थाच ह्रदो निर्धूमो निर्वह्नित्वादित्यादि स्फुलीयस्य यो यो धूमवान् स स वह्निमानित्युदाहरणवारणायेत्यर्थः ॥ लिङ्गपदस्य पक्षपरत्वे
पूर्वस्मादभेदापत्तिरतो व्याचष्टे ॥ लिङ्गं साध्यमिति यद्यपि लिङ्गविषयकं साधनवद्विशेष्यकमित्येव व्याख्यातुमुचितं ॥ ता
वतैवाधिमन्योपव्युदासात् तथाप्यग्रिमव्याख्या लिङ्गपदस्य साध्यपरत्वार्थं ग्रन्थगौरवापत्तिभिया वा लिङ्गं साध्यमुक्तमिति
ध्येयं ॥ तेनेति ॥ साध्यवद्विशेष्यकत्वपर्यन्तविवक्षणेनेत्यर्थः ॥ अन्यथा ह्रदो जलाभिन्नो भिन्नत्वादित्यादि स्फुलीयस्य यन्न जलं तन्न स्वे
तरप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलहृदाभिन्नकं च साध्यवत्तमवगाह ॥ मानत्वात्तत्रातिप्रसंगापत्तेरिति भावः ॥
जलेतरप्रकारकप्रमाविषयकत्वस्य हेतुतायामुदाहरणस्य लिङ्गविषयकत्वदले नैव वारणसंभवात् जलेतरप्रकारकप्रमा
विषयत्वाभावो हेतुरुक्तः स्पर्शादिसमवायिकारणतावच्छेदकीभूतजलत्वजातिद्व्यणुकपर्यन्तस्य कार्यत्वेऽपि जलानां मा

कपनमापाङकहेतोः साध्यव्यभिचारादाह ॥ इदं द्रव्यमिति ॥ यत्तु निरुक्तेतरत्वप्रकारकप्रमाविशेष्यत्वाभावो जलत्वमेवस्त्वेहाना
मन्वेतत्वेनतथात्वायोगात् ॥ तथा च यत्र जलमित्युक्तोदाहरणस्य जलत्वरूपालिङ्गाविषयकत्वादेव नातिव्याप्तिरतः ॥ स्वरूपानी त
नमाह ॥ इदं द्रव्यमितीति तन्नानिरुक्तेतरत्वप्रकारकप्रमाविशेष्यताभावस्यातिरिक्तत्वात् ॥ अन्यथा तुल्यन्यायेन जलान्यत्व
प्रकारकप्रमाविषयत्वाभावस्यापि जलत्वस्वरूपत्वेय न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषयत्वाभावस्यापि जलत्वस्वरूप
त्वेयन्न द्रव्यं ॥ तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वस्वरूपत्वेयन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय
इत्युदाहरणस्यापि जलत्वस्वरूपालिङ्गाविषयकत्वेनैव वारणसम्भवादिति ध्येयं ॥ जन्यजलस्य पक्षत्वे निरुक्तेतरत्वप्रकारकप्र
माविषयत्वशून्यं स्वरूपासिद्धं ॥ उत्पत्तिकालावच्छेदेन निरुक्तेतरत्वस्य तत्र सत्त्वादतो हेत्वन्तरमाह ॥ जलान्यत्वेति ॥ तथा चोक्तस्थ
लीयस्य यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्य द्रव्यत्वरूपसाध्यवद्भिन्नाप्यकत्वेपि तद्धर्मस्याविशेष्यक
त्वाभावान्नातिव्याप्तिरिति भावः ॥ ननु विषयत्वं प्रमेयत्वं ज्ञानजन्यज्ञानीयं प्रमेयत्वादित्यादिस्थलीये हेतावतिव्याप्तिः ॥ ताद
शानुपूर्व्याः सम्प्रदायविरोधेन न्यायघटकतया कथान्तरवारणेपि लक्षणो निर्धूमो निर्वह्नित्वादित्यादिस्थलीये यत्र धूमस्तत्र व

त्रितीति व्यतिरेक्युदाहरणेति व्याप्तिः तस्य साध्यवद्धूमावच्छेद्यत्वे कत्वात् ॥ यत्र धूमस्तत्र वह्निरित्याकारकस्यैवोदाहरणस्यासिद्धे व्यवस्था
पितत्वादित्यतः प्रकारान्तरमाह ॥ लिङ्गविषयके त्यादि पूर्वोक्तेति प्रकृतहेतुक प्रकृतसाध्यसिद्ध्यौपयिकेत्यर्थः ॥ ननु साध्यवद्विशेष्य
कत्वरूपस्य प्रागुक्तलिङ्गविषयकत्वस्य घटः प्रमेयो द्रव्यत्वादित्यादौ हेतावतिव्याप्तिः पञ्चम्यर्थस्यापि प्रमेयत्वस्यापि न साध्यता
दतः साध्यविषयकत्वरूपं तद्वाच्यं ॥ तच्च वह्निमान् वह्निसामग्रीमत्त्वादित्यादि हेतावतिप्रसक्तमत आह ॥ लिङ्गविषयकत्वं चेति ।
प्रकृतेत्यादि प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुतावच्छिन्नविषयत्वस्य बहिर्भूतमव्यापकं साध्यविषयत्वं तादृश
विशेष्यताबहिर्भूतविषयताकत्वमिति यावत् ॥ साध्यप्रवेशावश्यकत्वादिति ध्येयं ॥ हेतुतावच्छेदकावच्छिन्नेतस्य फलमाह ॥ वह्निमा
निति ॥ वह्निसामग्रीमत्त्वादित्यादि हेतुविशिष्ट हेतुत्वावच्छिन्नविशेष्यताव्यापकसाध्यविषयताकत्वेऽपि हेतुतावच्छेदकावच्छिन्नप्र
कारताकत्वव्यापकसाध्यविषयताकत्वविरहान्नातिव्याप्तिरिति भावः ॥ हेतुत्वावच्छिन्नविशेष्यताप्रवेशस्य फलमाह ॥ अयं
हेतुरिति ॥ अयं हेतुमान् हेतुत्वेनप्रतीयमानत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थविधया हेतुतावच्छेदकावच्छिन्नप्रकारताव्या
पकविषयतावत्त्वेऽपि तादृशविषयत्वस्य हेतुत्वावच्छिन्नविशेष्यताव्यापकत्वविरहान्नातिव्याप्तिरिति भावः ॥ ननु पक्षीयो साध्य

वगाहित्वविवक्षयैवोक्तहेतोर्वह्निमत्संभवान्निरुक्तविषयतापर्यंतानुधावनमफलमत आह॥ इदं चेति तथा चेदं हेतुत्वं हेतुत्वेनप्रती
यमानत्वादियादौ हेतुत्वं साध्यकस्य तु हेत्ववयवस्य पक्षीभूतहेतुतावच्छेदकधर्मतावच्छेदकीभूतहेतुत्वरूपसाध्यावगाहित्वात्तत्राति
व्याप्तिरेव स्याद्यादिनोक्ता विवक्षा स्यादिति भावः॥ नन्वेवं पञ्चावयवधूमानिष्ठादौ विषयतासंबंधेन बुध्यवच्छिन्नस्यैव समवायेन हेतु
त्वेतत्र वह्निमत्त्वसादौ हेत्ववयवेति व्याप्तिः॥ तत्र्यम त्वर्थबुद्धिसंबंधित्वप्रकारेणैव हेतुतावगाहितया हेतुतावच्छेदकधर्मावच्छिन्न
प्रकारतानिरूपितहेतुत्वविशेष्यताबहिर्भावेणैव साध्यावगाहित्वात्॥ तथायमेको धूमादिसत्त्वापि हेतावेतिव्याप्तिः तस्यापि निरुक्त
विषयताबहिर्भावेणाप्रकृतार्थे एकरूपसाध्यावगाहित्वादिति चेन्न। यत्साध्यकतयोद्दिष्टहेत्ववयवानोपादानायोक्ता विषयतोक
बाधजनकत्वं संप्रदायसिद्धं तादृशविषयताबहिर्भावेण साध्यावगाहित्वस्य विवक्षितत्वात्॥ उक्तहेतुनां तथात्वादिति भावः॥ प्रति
ज्ञादिउपनयादिवाक्यार्थेऽनियतत्वं प्रकृतहेतुविषयकज्ञानजनकत्वव्याप्यार्थकप्रतिज्ञात्वस्यापि क्वाचित्कलिङ्गविषयकज्ञानज
नकत्वसमानाधिकरणत्वादनियतत्वानुसरणात् अप्रसिद्धहेतुकोदाहरणस्थले लिङ्गविषयकज्ञानजनकत्वानियतस्योदाहरण
त्वस्य वारणायालिङ्गविषये दिप्रकृतसाध्याविषयकज्ञानजनकत्वमिति तदर्थः॥ इदं जलं निरग्नि ह्रदत्वाभावादित्यादौ यत्र जलत्वेनाग्निहत
वह्न्याद्युदाहरणे तदुदाहरणत्वमादाय अतिप्रसंगवारणायाधर्मावयवतावच्छेदकत्वमुक्तं दुर्ग्रहत्वादित्युपलक्षणीयं साध्यकप्रतिज्ञायां

सिं.वा विषयकत्वनियमः ॥ तत्र प्रागुक्तरीत्या अव्याप्तिश्चेषापि द्रष्टव्या ॥ न्यायावयवार्थमिति नवन्यायान्तर्गतत्वमात्रं सम्यक् तावताप्यु
दासीनस्य धूमादिवाक्यस्य वारणासंभवादिति वाच्यं ॥ निगमनैकदेशे तस्मादित्यादावतिव्याप्त्यापत्तेरिति उपनयादौ नोवक्ष्यमा
णहेतुविभक्तिमत्त्वेनैव वारणसंभवादाह ॥ निगमनेति ॥ ननु वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ हेतावव्याप्तिः ॥ तस्य साध्या
विषयकज्ञानजनकत्वाभावादत आह ॥ साध्याविषयकत्वं चेति ॥ प्रकृतेति ॥ तथा च हेतुतावच्छेदकावच्छिन्नप्रकारतानिरू
पितहेतुतावच्छिन्नविशेष्यतो तो बहिर्भावेणायत्साध्याविषयत्वं तच्छून्यज्ञानजनकत्वमर्थः ॥ न च तादृशविशेष्यताबहिर्भूत
विषयताशून्यत्वस्यैव सम्यक्त्वे साध्यप्रवेशो व्यर्थ इति वाच्यं ॥ अखण्डाभावघटकत्वात् ॥ न च तथाप्यनतिप्रयोजनकत्वं हेतुवि
भक्तिमत्त्वदलस्य सार्थकत्वस्यैवातिप्रयोजनत्वात् ॥ अन्यथावारणीयव्यक्तिनैक्यमुदाहरणादौ निरुक्तविषयतावत्त्वादेवातिव्याप्ति
विरहेण तद्दलवैयर्थ्यापत्तेः ॥ न चेदमनेकधूमादिमादौ हेतावव्याप्तिः ॥ तस्य हेतुविशिष्टहेतुविषयताबहिर्भावविषयकत्वरूपसाध्या
वगाहित्वादिति वाच्यं ॥ धूमादावेकत्वस्याप्यवयतानिश्चयकाले नस्य केवलधूमादिहेतुताहेतुताबोधस्य जनकतामादायैव ता
न लक्षणासंभवादिति भावः ॥ न त्वेवमपि यत्राय बुद्धिमानित्यादौ विषयितासंबंधेन बुध्यवच्छिन्नसमवायेन हेतुत्वं तत्र बाधितं ते

तद्दशादौ हेतुतावव्याप्तिः तस्य हेतुप्रकारताकनिरूपितहेतुत्वविषयता वह्निभाविका न तु वर्यस्य संबंध्यत्वेनोपस्थितरूपसाध्यावच्छिन्नावादत
आह ॥ पूर्वोपदर्शितेति ॥ प्रतिज्ञालक्षणोदर्शितेत्यर्थः ॥ तथा च पक्षकर्तृसाध्यकप्रतिज्ञाव्यक्तौ नोपस्थितो हि न्यकसाध्यनिष्ठयाद
शायादृशविशेषणताकबोधजनकत्वं साध्यनिष्ठतादृशतादृशाविशेषणताशून्यबोधजनकत्वमर्थः ॥ नु नोक्तहेतावव्यस्तीति ना
व्याप्तिः अत्र साक्षात्पक्षविशेषणत्वेन साध्यविषयत्वेन तच्छून्यत्वमात्रोक्तौ तस्मादुद्भूत तृतीयादिनिगमनेति व्याप्तिः ॥ तत्रावच्छ्या
तार्थकत्वेनैव प्रतिज्ञायाः पक्षधर्मिकसाध्यविशेषणकबोधजनकत्वादतः परं पर्यवसितं तन्मात्रोक्तौ च तस्मात् पचतीति निग
मनेति व्याप्तिस्तस्य साक्षादेव प्रतिज्ञायाः पक्षधर्मिकसाध्यप्रकारकज्ञानजनकत्वादतो द्वयमुपात्तं च ॥ साध्यनिष्ठविशेष
णतानां प्रातिस्विकरूपेण प्रवेशादननुगमः तादृशविशेषणताभावकूटस्याननुगतत्वात् ॥ पक्षनिष्ठमुख्यविशेष्यतानिरूपितवि
षयतावच्छेदकसाध्यनिष्ठविशेषणतात्वेन कथंचिदुपगमयितुं शक्यत्वाच्च न चैवं तस्मात् पचतीत्यादिनिगमनेति व्याप्तिरिति वाच्यम् ॥
स्वस्यापि स्वघटतया साध्यनिष्ठविधेयतायाः आर्पितादृशाविशेषणतात्वादिति भावः ॥ पूर्वोपदर्शितेति वह्निमान्वह्निसामानाधिमत्वा
दित्यादावित्यर्थः ॥ यद्यपि हेतुविभक्तिमत्त्वानुक्तौ हृदो निर्धूमो वह्निमत्त्वादौ व्यतिरेकमुदाहरणापरत्वात् इति व्याप्तिः ॥ तथाप्यत्राविवक्षणीय

तदर्थस्य व्याख्यार्थस्थानीतरमाह ॥ इदमिति ॥ दण्डसंयोगाजन्येति संयोगपदं साध्याविशेषणस्य द्रव्यत्वपदं च गगनादौ व्यभिचारवार
णाय अजन्यत्वस्यैव हेतुत्वसंभवेप्यखण्डाभावतया दण्डसंयोगजन्यत्वे व्यर्थविशेषणताभावः ननूक्तस्थलीयस्य यद्दण्डजन्यं तद्द
ण्डसंयोगाजन्यद्रव्यत्वाभाववदुदाहरणस्य ज्ञानज्ञाप्यत्वरूपहेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रेणापि वारणसंभवादपि ग्रे साध्या
न्वयबोधनक्षमेत्यादिपर्यंतविवक्षा व्यर्थेत्यत आह ॥ अयं न धूमादिति अन्वय्युदाहरणस्य साध्याविषयकत्वदशायां नैव वारणसं
भवादाह ॥ व्यतिरेकीति ॥ न्याय इति शेषः ॥ यद्यप्युक्तस्थलीयस्य धूमादालोकव्यापकीभूताभावप्रतियोगित्वाद्रेंधनाद्यन्यत
वान्नयमिति याकारकोपनयस्यापि वारणसंभवादुदाहरणमात्रानुसरणमयुक्तं ॥ तथापि साध्यतावच्छेदकावच्छिन्नसाध्यवत्
मुपनेयमिति प्राचां प्रवादमनुरुध्य तादृशोपनयः परिसक्तः ॥ ननु प्रकृतसाध्यान्वितस्वार्थबोधकहेतुतावच्छेदकपदपरत्वे साध्य
कोदाहरणस्य वारणसंभवाद्विभक्तिपर्यंतानुसरणं विफलमत आह ॥ हेतुत्वपक्षकेति घटादिपक्षकोपनयस्याविभक्तिपदा
प्रवेशेपि प्रकृतसाध्यान्वितस्वार्थबोधकहेतुतावच्छेदकपदपरत्वाविवक्षयापि वारणसंभवाद्धेतुत्वपक्षकोपनयानुसरणं न्यायोप
नयमात्रस्यैव साध्याविशेषणकत्वदशायां नैव वारणसंभवादिदमयुक्तं पूर्वपक्षवदितिसादि द्वितीयकल्पोक्तसाध्याविषयकत्वस्यै

शि

वोपनयेपि संभवात्प्रकृतहेतुविशिष्टहेतुत्वविषयिता वह्निर्भावेपा साध्याविषयकत्वकल्पे तु हेतुत्वेन रूपं गुणाभिन्नत्वादित्यादिस्थ
लीयस्य रूपत्वव्यापकाभावप्रतियोगि गुणान्यत्ववदिदमित्येवं व्यतिरेक्युपनयवारणार्थं विभक्तिपदं तस्यापि तस्माद्रूपमित्याको
नकानिगमनोपस्थापितसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकं पदपत्वादिति वदीति यथाश्रुतमूलेन वारयितुमशक्यत्वात् तदर्थमि
ति॥ अयं धूमाद्वह्निमानालोकादित्यादिस्थलीयस्य धूमा वह्निव्याप्यालोकवानयमित्युपनयस्यापि वह्निस्वरूपसाध्यान्वितस्वा
र्थबोधकपञ्चमीविभक्तिमत्वात्तस्मात्यतिव्याप्तिरतः प्रकृतपदं तथा च तत्र धूमज्ञानज्ञाप्यवह्निमावद्धि न्नेपञ्चम्यर्थहेतुत्वस्यानन्वया
न्नातिव्याप्तिः ननु प्रकृतहेतुविशिष्टहेतुत्वविषयता वह्निर्भावेसाध्याविषयकत्वदलस्य प्रवेशाकल्पे मूलोक्तं हेतुपदं व्यर्थं प्रकृतसा
ध्यान्वितस्वार्थोपस्थितिजनकविभक्तिमत्वस्यैव सम्यक्त्वादित्यादि॥ हेत्विति॥ पूर्वापदिति साध्या द्वितीयसाध्याविषयकत्वकल्पे तु
हेतुत्वबोधकार्थकं हेतुपदं देयमेव अन्यथा गुणाभावो गुणत्वरूपद्रव्याभिन्नत्वादित्यादिस्थलीयस्य गुणाव्यापकीभूताभावप्रति
योगिद्रव्यान्यत्ववानित्याकारकव्यतिरेक्युपनयस्यापि पक्षीभूतप्रकृतसाध्यान्वितैकत्वोपस्थितिजनकप्रथमाविभक्तिमत्वात्तत्रा
तिव्याप्त्यापत्तेः वस्तुतः प्रथमकल्पेपि हेतुपदादेव प्रकृतसाध्यान्वितस्वार्थोपस्थितिलाभात् तद्व्यर्थं सामान्यशब्दस्य विशेषपरता

याः स्वप्रतीतिसिद्धत्वादिति परमार्थः ॥ ननु पर्वतत्वत्तदनुमितीयपर्वताभिन्नत्वप्रकारकज्ञाने यस्य विशेष्यतयाभाववान् तदनुमितीयतादृश
निश्चयाभावादित्यादिस्थले यस्य यत्पक्षतदनुमितीयपर्वताभिन्नत्वप्रकारकनिश्चयवान् सतादृशनिश्चयवान् यथा तदनुमितीयताद
शनिश्चयाभावादुत्पन्नं ज्ञानमिति साध्यदाहरणस्यापि प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेणोत्पन्नं ज्ञानांशे प्रकारतावच्छे
दकतया साध्यावगाहित्वेपि पूर्वापरदर्शितसाक्षात्तनपया साधारणसाध्याविषयकत्वासत्वात साध्यान्वितसाध्यबोधकपञ्चमी विभक्ति
महत्वाद्द्वितीयकल्पे तत्रापि व्याप्तिनिरासाशंकते यदि चेति ॥ पर्वत इति ॥ पक्ष इति शेषः ॥ पर्वताभिन्नत्वेनेति तदनुमितीयपर्वताभिन्नत्वप्रकार
कनिश्चयस्य इत्यर्थः । यथाश्रुते तादृशज्ञानाभाववद्भिन्नाभावस्य ज्ञानानुत्पादकतया वक्ष्यमाणदृष्टान्तासंगतेः । विशेष्यतासंबन्धेन ता
दृशनिश्चयत्वाभावादेव पर्वतत्वादिप्रकारकज्ञानस्योत्पादात् अत एव बहुमानस्यैव पर्वताभिन्नमित्याकारकभ्रमविशेष्यत्वात्साध्या
प्रसिद्धिरिति यदपि संदूषणं समाहितं ॥ तादृशभ्रमशून्यपुरुषस्यैव साध्यातस्माबात् । प्रकृत्याप्यवच्छेदेन विशेष्यतया तादृशज्ञाना
भावस्य पर्वते संभवादिति ध्येयं ॥ ननु साध्यस्यैव हेतुत्वे विवादागसंशयाभावान्यायस्यैव नास्तिकस्योदाहरणे व्याप्तिनाशं कयत इत्य
त आह । किं साध्यरूपेति । इदं च स्वरूपसंबन्धेनैव साध्यसाधनभावमभिप्रेत्योक्तं स्वरूपकालिकाभ्यां तादृशज्ञानाभावस्य साध्य

साधनस्थले ऽनुमितेर्विनापि न्यायप्रयोगसंभवादिति मन्तव्यं ।। तादृशज्ञानाभावादिति तदनुपूर्वीयपर्वतभिन्नत्वप्रकारकनिश्च
याभावादित्यर्थः ।। अन्वय्युदाहरणस्य साक्षात्परंपरया साधारण्यात्प्रकृतत पक्षविशेषणतावच्छेदकसाध्याविषयतानुपूर्व्यज्ञानजनकत्वदले
नैवावारणसंभवाद्व्यतिरेकीति द्वैनं तदुदाहरणवावान्तरधर्ममेवम् लोके हेतुपदं ज्ञापकत्वरूपहेतुत्वबोधकार्थकमस्तु प्रकृतस्थले लिं
यपंचम्याः कारणत्वमात्रबोधकत्वादिति वाच्यं ।। यत्र पर्वतभिन्नत्वज्ञानाभावव्याप्यस्यैव ज्ञानस्य यथा पर्वतभिन्नत्वज्ञानाभावात् ज्ञा
नमित्येवं दृष्टांतस्तादृशोदाहरणे तथाप्यतिव्याप्तितादवस्थ्यादिति भावः ।। दृष्टांतस्योदाहरणघटकत्वेन सर्वसंमततमतो यादिचेत्तु
क्तं ।। यत्तु प्रकृतसाध्यविशेष्यकस्यार्थान्वयबोधजनकत्वविवक्षयैवकाधिकोदाहरणव्युदाससंभवादिवेत्युक्तमिति तन्न साध्य
विशेष्यकान्वयप्रवेशे विभक्तिपदव्यर्थतापत्तेः ।। उपनयस्थलीयपदस्य साध्यप्रकारकान्वयबोधं प्रत्येव हेतुतया तत्रातिप्रसंगा
भावादिति ध्येयं ।। अवयवांतरेति ।। न च वयवांतरेण प्रतिज्ञादिना साध्याविधया वस्तुगत्योपस्थितो यः पर्वतभिन्नत्वप्रकारकज्ञाना
भावस्तदान्वितस्य स्वार्थस्यान्वयबोधकत्वमुक्तोदाहरणस्थलपंचम्या अपीति तीतिव्याप्तितादवस्थ्यमिति वाच्यं ।। अवयवांत
रस्थपदसाकांक्षविभक्तिमत्त्वस्य विवक्षितत्वादिति भावः ।। वक्तव्यमिति ।। हेतुविभक्तिमत्पदत्वेनेति शेषः ।। अवयवांतरादिप्रवे

शामपेक्ष्य लाघवादाह ॥ उदाहरणान्येति ॥ साध्येत्यादि ॥ अत्रानियततोतं निगमनत्वस्यानियततांतमुदाहरणत्वस्य व्युदासाय
बोध्यं ॥ सर्वसाधारणस्य हेतुत्वनिगमनत्वोदेर्दर्थयत्वान्नेदयुक्तमित्याशयेनाह ॥ तृतीयेत्यमिति ॥ ननु निगमनादेरपि हेतुत्वप
तिपादकविभक्तिमत्त्वात्तत्राति व्याप्तिरतो व्याचष्टे ॥ [illegible] कसमर्थेति विभक्त्यर्थीभूतस्य हेतुत्वं तादृशविशेष्यकान्वयबोधजन
कसमर्थः ॥ हेतुत्वमित्यादि यद्यपि नान्योपकस्थापितहेतुत्वस्य विभक्त्यर्थत्वात्तद्रूपतादवस्थ्यं तथापि विभक्तिजन्यहेतुबोध
स्येति सहकारेण हेतुत्वविशेष्यकान्वयबोधजनकत्वं विवक्षितं न चैवं हेतुत्वमित्याद्विकृतीयस्य तस्माद्धेतुत्वमित्यादि
निगमनस्यैवमप्यवारणात् तस्य पंचमीजन्यहेतुत्वोपस्थितिसहकारेणैव तादृशबोधजनकत्वादिति वाच्यं ॥ हेतुत्वविधेय
कबोधजनकत्वेनापि विभक्तिजन्यहेतुत्वोपस्थितौ विशेषणीयत्वात् तथा च तस्माद्धेतुत्वमित्यादौ पंचम्यर्थहेतुत्वस्य साध्यी
भूतहेतुत्वांशे विधेयतयैव भानात्तद्वारणमिति भावः ॥ तस्य तत्र सादिनो तस्मात् पंचतीत्यादि निगमनस्य संग्रहस्तस्या
व्याप्तविभक्त्यर्थविशेष्यकबोधजनकत्वादिति भावः ॥ ननु [illegible] दंडादित्यादिप्रतिज्ञास्वृत्ती यस्य तस्माद्दंडादित्यादि
निगमनस्यापि पंचम्यर्थहेतुत्वविशेष्यकबोधजनकत्वात्तत्राति व्याप्तिरत आह ॥ घटो दंडादिति ॥ ननु घटो दंडादित्य

घ

त्र जनकत्वमेव पंचम्यर्थ इति तत्रत्यनिगमनस्य ज्ञापकत्वलक्षणहेतुत्वविवक्षोपकत्वाभावादेवानन्वयो भविष्यतीत्यत आह ॥ वह्निर्धूमादिति ॥
तदवृत्तेरिति पंचम्यर्थहेतुतायाः दंडादिवृत्तित्वेन घटवृत्तेरिति भावः ॥ स्वावृत्तेर्नापि ॥ स्वस्य तादात्म्येन विशिष्टधर्मव्यापकत्वादाह ॥ अतदात्म
न इति ॥ तथा च तादात्म्येतरवृत्तिनियामकसंबंधेनैव व्यापकत्वविवक्षणादुक्तक्रमेण सव्याप्यस्यैव नास्ति कस्यापि निगमनेति व्याप्तिरिति भा
वः ॥ ननु दंडादिवृत्तिहेतुताया अपि निरूपकतासंबंधेन घटादिवृत्तित्वमस्त्येव वृत्त्यनियामकसंयोगादिना गगनादेः पृथिवीत्वादिव्यापकत्व
स्य स्वयमेवोक्तत्वात् न त्वर्थान्वयानुरोधेन जन्यत्वस्य ज्ञानज्ञाप्यत्व एव वस्य च पंचम्यर्थत्वमतोऽपि घटे वन्ह्यादौ च तादृशसाध्यस्य वर्तमानत्वाद्
दं न युक्तमत आह ॥ संप्रदायेति न च विवादगस्य संशयादेः शाब्दप्रमोपयुक्तस्य साकांक्षादेः संभवेऽपि वह्निः धूमादित्यादिप्रतिज्ञानंगीका
रो निर्वीजत्वमाप्रदायकानामिति वाच्यम् ॥ एकमुद्दयेन समं सामान्यतएकमुद्बधंतरान्वयस्याव्युत्पन्नतया प्रतिज्ञादिनिष्ठपंचम्यु
पस्थापिते धूमज्ञाने ज्ञाप्यत्वरूपसाध्येऽन्वयानुपपत्तौ पंचम्यर्थानुभवासंभवस्यैव तदनंगीकारबीजत्वात् ॥ अन्यथा गृहे घटस्याभावादितोऽपि घ
टसंबोधग्रह इतीत्याकारकबोधप्रसंगात् ॥ अत एव धने चैत्रस्याभावादितोऽपि चैत्रस्वत्ववधनमित्याकारकबोधः ॥ ननु चैत्रस्वत्वध
नमित्याकारको बोधः सप्तम्यर्थाधेयत्वस्य षष्ठ्यर्थस्वत्वेऽन्वयस्याव्युत्पन्नत्वात् न च क्रियाचैत्रस्य धनमित्यादितः क्रियाजन्यचैत्रस्वत्वस्य ध

नादौ प्रतीत्यनुसंधानसुकरत्वेन समर्थस्वार्थमुख्यविशेष्यकान्वयबोधजनकत्वमेव सुपासव्युत्पत्तेः तथाच वह्निधूमादिमानादिप्रतिज्ञायां पंच
म्यर्थस्य पक्षविशेषणत्वात् तयामुख्यविशेष्यताभावाद नेहेतंतर्गतपंचम्यन्वये बाधकाभाव इति वाच्यं। तावतापि तस्मात् धूमादि
त्येवं निगमनान्तर्गतयोः पंचम्यर्थयोः परस्परान्वयासंभवेन संप्रदायविरोधस्यावारकत्वात्। तत्र धूमज्ञाप्यत्वादि साध्यस्य
मुख्यविशेष्यतयैव भानादिति भावः। तादृशयोग्यतासत्त्वादिति धूमादित्यादिवाक्यस्येत्यादिः वैयर्थ्यादिति। प्रकृतव्याप्ति
तात्पर्यकत्वभावस्यैव सम्यक्त्वादिति भावः। प्रतिज्ञातस्य हेतुपंचम्यन्तत्वेनैव वारणादाह। अयं नदृष्टादित्यादि यथाश्रु
त साध्याविषयकत्वस्य वह्निमान्वह्निसामग्रीमत्त्वादित्यादिस्थलीयहेतावव्याप्तेनाह। आख्यातार्थमिति। तथाच स्वहेत
हेतुविशिष्टहेतुत्वविषयताव्याप्तिभावेन यत्साध्यविषयकत्वं तदभावो ग्राह्यः। अन्यथापि उपनयस्यानिरुक्तसाध्याविषयकत्व
दलेनैव वारणादाह। उपनयाविशेषेति। तथाच ह्रदो निर्धूमो निर्वह्नित्वादित्यादिस्थलीयस्य धर्मव्यापकीभूताभावप्रतियो
गिनिर्वह्नित्वानयनमित्याकारकव्यतिरेक्युपनयवारणाय सर्वशः। यद्यप्युक्तलीयादाहरणेऽपि हेतुपंचम्यन्तेन नवारणं स्या।

भवति तथाप्यग्रे वक्ष्यमाणोदाहरणान्यतमेनैव तदाहरणासंभवादुपनयमात्रानुसरणं ॥ ननु पञ्चम्यन्तस्यैव सम्यक्त्वाद्धेतुपदं
व्यर्थमत आह ॥ हेत्विति ॥ वैकल्पिकमिति ॥ तथा निकृष्टसाध्याविषयकत्वाविशेषितहेतुप्रतिपादकतावच्छेदकत्वं वा
लक्षणार्थः ॥ ननु हेतुत्वं निर्धूमो वह्निमानित्यादिस्थलीयस्य व्यतिरेक्युपनयस्यापि हेतुप्रतिपादकमिदंपदमतो
भूतमिति तत्र प्रथमानिकृष्टस्यातिव्याप्तिरत आह ॥ उपनयस्य चेति ॥ चरमानुसंधानविषयत्वमेव प्रकृतत्वमिति भावः ॥ न
नु घटो वाक्याभिन्नः शब्दान्यत्वादित्यादिस्थलीयस्य पक्षधर्मकार्यत्वाद्यो यथा दण्डादिषूदाहरणस्यापि पञ्चम्यन्तत्वात्तत्र
द्वितीयानिकृष्टस्यातिव्याप्तिरत आह ॥ तथा दण्डादिवदित्यादेरिति दृष्टान्तस्येति प्रथमेनैतदिति पूर्वं णान्वयः ॥ अन्वयो यो वा दित्ति
समासातिरिक्तस्थले नामार्थयोरभेदेनान्वये नाम्नोः समानविभक्तिकत्वस्य तन्त्रत्वादिति भावः ॥ इदं च वस्तुगतिः ननु घटो
ऽस्त्वपरदृष्टान्तस्य पञ्चम्यन्तत्वेऽपि वक्ष्यमाणोदाहरणस्य हेतोरेव तत्रातिव्याप्तिवारणासंभवादिति ध्येयं ॥ अथायं गोभिन्नो द्रव्या
न्यत्वादित्यादिस्थलीयस्य यो यो गोत्वद्रव्यं यथा पशुः सास्ना ॥ वत्सादिषूदाहरणस्यापि हेतुपञ्चम्यन्तत्वात्तत्रातिव्याप्तिरत आह ॥
कस्यचिदिति ॥ उदाहरणस्य दृष्टान्तघटितत्वं न सर्वसंमतमित्याशयेनाह ॥ संभवेदिति ॥ पूर्ववादीति उदाहरणाभिन्नत्वविवक्षये

सर्थः ॥ ननु वह्निमान् वह्निः इत्यादिहेतावव्याप्तिः ॥ तस्य तसिलं तह्येन पंचम्यंतत्वविरहादत आह ॥ अत्र चेति ॥ तथा च तसिलो निरर्थक
तया लुप्तपंचम्यंतभावाभावस्यैवोऽर्थत्वाद् अव्याप्तिः पंचम्यंतपदेन पंचमी । भिन्नस्वघटकयावदर्थकोक्तं न पंचमीघटितस्योक्तत्वादि
ति भावः ॥ पंचम्यास्तसिलिति सूत्रस्य पंचम्यास्थाने तसिलित्यभिप्रायात् । पंचम्यादेरित्यत ॥ आदिपदाभ्यां समम्यादेस्त्वाद्यादेशप
रिग्रहः नानुपपत्तिरिति ॥ आदेशस्थानितायाः पंचम्या एवानुसंधीयमानत्वादिति भावः ॥ यथाश्रुते न धूमादालोकवान् पर्वतो वह्निमा
नित्यादिप्रतिज्ञादेर्वारणासंभवादाह । पूर्ववदिति ॥ प्रकृतसाध्यविशेष्यकप्रकृतहेतुविशिष्टप्रकारकान्वयबोधजनकपदवत्वमित्यर्थः ॥
न च प्रकृतहेतुविशिष्टदलं व्यर्थं आलोकाद्वह्निमतः सधर्मापर्वतो वह्निमानित्यादिप्रतिज्ञायामतिव्याप्तिवारकत्वादिति भावः ॥ इत्थं च धू
माद्वह्निमतस्सधर्मापर्वतो वह्निमानित्यादिप्रतिज्ञायास्तस्माद्वह्निमानित्यादिनिगमनस्य च व्युदासार्थं निरुक्तसाध्यविषयकत्वदलं त
च वह्निमान् वह्निसामग्रीमत्वादित्यादिहेतावव्याप्तमतो व्याचष्टे साध्याविषयकेत्यादि प्रतियोगितावच्छेदकेत्यादौ मध्यस्थन्यायादिस्व
मुदितान्वयस्य व्याप्तिसिद्धत्वादिति भावः । इत्येत्यादि हेत्ववयवमात्रस्यैव प्रतिज्ञैकवाक्यतया हेतुत्वविशिष्टसाध्यज्ञानजनकत्वास्व
स्वापत्तिरतो नैरपेक्ष्यांतं पर्वतो धूमज्ञाप्यवह्निमान् धूमाद्वह्निसामग्र्या इत्यादिहेतावव्याप्तिस्तस्याप्यवयवांतरनैरपेक्ष्येण हेतुत्वा

विशिष्टसाध्यज्ञानजनकत्वादतः प्रकृतपदं तथा चैतन्नैरपेक्ष्येण प्रकृतहेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानाजनकत्वमर्थः॥
स्यायोक्तहेतावस्यैव तत्र प्रकृतहेतुभूतधूमाद्यलिङ्गामग्री विशिष्टहेतुत्वस्य ग्रहणावप्रकारकत्वादिति भावः॥ वैयर्थ्यादिति॥ यद्यपि प्रकृत
हेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानजनकताभावस्याखण्डत्वान्न वैयर्थ्यं तथाप्यनतिप्रयोजनकत्वे तात्पर्यं अत्रोदक्षनत्व मो
बास्वरस्यः कोत्रेदिसूचितः ननूदासीनस्यापि धूमादिस्यादिवाक्यस्यानुमित्यनुकूलत्वेन कथंचिदनुमितिप्रयोजकत्वान्न व्याप्ति
रतो व्याचष्टे॥ अवयवत्वमिति एतदनन्तरमेव पंचम्यन्तेति पाठो युक्तः लक्षणाद्यपि वानुमितिपरत्वस्यानिविष्टत्वेन पूर्वत्रैव तस्य व्याख्या
तुमुचितत्वात् तावतैव तदर्थलाभसंभवादिति ध्येयम्॥ ननु निगमनस्य पञ्चम्याद्विवक्षणीयलाक्षणिकपदवत्त्वाभावादेव व्युदाससंभवे तद्वार
णार्थं पञ्चम्यन्तपदं व्यर्थमतः पञ्चमीपदमादायैवानिगमनस्य लाक्षणिकपदवत्त्वं व्यवस्थापयितुमाह॥ हेतुत्वादावीति हेतुसंज्ञापकत्वं आदि
ना ज्ञाप्यत्वादेः परिग्रहः लघुनिरूपकतावच्छेदकसंभवति न लक्षणा अतो लघुशक्यार्थं दर्शयति। वृक्षादिभिन्नत इति वृक्षादिनिष्ठपदबाध्य
त्वं निरूपकतासंबन्धेन तद्वान्यो विभागस्तदाश्रयत्वमित्याकारको न्वयबोधः॥ ननु निरूपकतासंबन्धेनावधित्वस्य विभागेन्वयेपात्यय
विभागे व्ययर्थे विभागो नष्टादिसादिप्रयोगः स्यात् संयोगादिसंबन्धेनैवावधित्वानिष्टा वाधित्वाभावस्य तत्र सत्त्वात्॥ निरूपकतासंबं

दि

धस्य रस नियामकतयाप्रतियोगितानवच्छेदकत्वादत आह ॥ अवधिमत्वेवेति ॥ तथा च यद् निरूपितं यदवधिमत्त्वं स्वरूपसंबंधावच्छिन्नतदभा
वस्य घटीयविभागे विरहान्नोक्तप्रयोग इति भावः ॥ ननु विभागाद्यनिष्ठे अवधिमत्वे प्रमाणाभाव इत्यत आह ॥ द्रव्यहत्यादि अवधिमत्वेन
वेति इत्यर्थः ॥ स्पाद्रूपं तच्चानुभूयमानानुभूयमानत्वेन तथा चानुभवरतत्र प्रमाणमिति भावः ॥ न च संबंधाविरोधः ॥ अतिरिक्तेति ॥ विभा
गाद्यात्मादिः अनतिरिक्तो वेति न च एवं जनकत्वादेः संबंधत्वमते तत्रापि पंचम्याः शक्तिः स्यादिति वाच्यं ॥ तथात्वेपि क्ष भावात् ॥ अत एव हे
तुत्वे ज्ञापकत्वेपीत्यादि स्वयमेवाग्रे वक्ष्यते ननु ज्ञापकत्वादिरूपहेतुत्वादौ पंचम्याः शक्यभावे पंचमीज्ञाप्यावधिमत्त्वस्य संबंधाग्रहे
दग्न्यायां धूमाद्वह्निमानिति ज्ञाप्यप्रतीतिः कथं स्यादत आह ॥ संबंधेति ॥ हेतुत्वादावधिमत्वान्यतरादि पञ्चम्यर्थक्यस्य संबंधाग्रह
इत्यर्थः ॥ अवधित्वानिरूपकत्वातिरिक्तमवधिमत्वं यदि विभागानिष्ठं नानुभवसिद्धं ॥ तदा विभागापेक्षयाऽनुगतत्वात्तस्य ज्ञाप्यत्व
र्थे निसाचार्येणाह वृक्षादपैतीति ॥ ननु विनापि पंचम्यंत समभिव्याहारमपैतीत्यादि भागावच्छिन्नक्रियाबोधाद्वृक्षादपै
तीत्यत्रापि विभागो धातुलभ्यः एव पंचम्यास्तु विभागान्वितमाधेयत्वमवधित्वनिरूपकत्वं वाऽर्थ इत्यतस्तत्त्वानातत्वमाह ॥ पततीत्यादि ॥
अत्र च गुरुत्वजन्यतावच्छेदिका पतनत्वजातिरेव पतेः शक्यतावच्छेदिका विभागावच्छिन्नक्रियात्वं तदपेक्षया गुरुत्वादतो नोक्तक्रमा

दनः ननु धात्वर्थपतनादौ विकारवत्वस्य बाधितत्वाद्विभागजनकत्वमेव पंचम्यर्थो वाच्यः तत्कुतो ज्ञापकत्वाद्यपेक्षया लाघवमत आह॥ तज्ज
नकत्वं चेति॥ तथा च जनकतासंबंधेन विभागस्य क्रियायां प्रकारो ननु जनकत्वं प्रकार इति नोक्तदोष इति भावः॥ न च वृक्षात्पतनेऽपि नो
दपतनं वृक्षादिति प्रयोगः स्यात् पतनस्य संबंधितत्वेन वृक्षावधिकविभागाभाववत्वात्॥ जनकत्वस्य वृत्तिनियामकतया तत्संबंधेन
विभागाभावस्य बोधयितुमशक्यत्वादिति वाच्यं॥ तत्र नञः समभिव्याहृतपंचम्या विभागजनकत्वे लाक्षणिकत्वादिति भावः॥ पं
चम्यंतं तदिति अन्यथा तस्माद्वह्निमान् इत्यादौ निर्गमनस्यापि पंचमीस्वरूपलाक्षणिकपदवत्त्वात् तत्राति व्याप्तिः स्यादिति भावः॥ न च
तस्माद्वह्निमानित्यादावपि ज्ञानजनकत्वलक्षणं हेतुत्वं जन्यज्ञानविषयत्वलक्षणं ज्ञानज्ञाप्यत्वं वा न पंचम्यर्थः॥ येनाविभागापेक्षया
गुरुत्वात् न लक्षणा स्यात् किंतु ज्ञानं॥ नैतदर्थः तत्त्वाद्विभागसमवायितया शक्यमेव तत्र — पर्वतो(?) पितस्य धूमादिज्ञानस्य जनकत्व
संबंधेन पंचम्यर्थज्ञाने न्वयादेव धूमज्ञानादौ ज्ञापकत्वादिलक्षणास्वीकारे तु तादृशो(?)भयसंभवादिति वाच्यं॥ विभागवत्स्यैव ज्ञानत्वस्य ल
घुत्वोपितदवधि(?) त्वेन पंचम्याः स्थानासिकप्रतिप्रयोगाभावेन लक्षणायास्तत्रावश्यकत्वात् अन्यथा घटादिपदस्यापि पटादौ शक्यतापत्ति
पटस्यापि घटत्वलघुत्वादिति भावः॥ केचित्तु यत्राविनश्यद्वस्तौ नैवालिंगपरामर्शेन साध्यस्य ज्ञानं जायते तत्रालिंगज्ञानस्य जनक

तसंबंधेन साध्यज्ञानेनान्वयः ॥ भिन्नकालीनयोर्विषयतान्यसंबंधेन वैशिष्ट्याविग्रहादत एतादृशस्थले साध्यहेतुकवाक्यतया अन्वयबो
धस्य प्रामाण्यार्थं ज्ञानजनकत्वं लक्षणं ज्ञापकहेतुजन्यज्ञानविषयत्वरूपं ज्ञाप्यत्वमेवेत्यापञ्चम्यर्थो न तु ज्ञानमात्रं तदर्थ इत्याहुः तच्छी· ह· प्र
तियोगितासंबंधेन घटितधर्मयोरेव परामर्शानुमित्योरपि भिन्नकालीनयोर्जनकत्वादिसंबंधेन वैशिष्ट्यान्वयस्यं भवाद्भिन्नकाली
नयोराधाराधेयभावस्यैव विषयतान्यसंबंधेन दीधितिकृता बंधादिकौ नाट्यपर्यानिमसितत्वादिति ननु पञ्चम्यन्तलाक्षणिकपदवतोऽप्या
वयविनिगमनेति व्याप्तिरेव तन्निविष्टतच्छब्दस्य पञ्चम्यन्तत्वात् धूमादिज्ञानलाक्षणिकज्ञानलाक्षणिकत्वाच्चेत्यत आह ॥ तस्मादिति ॥ वाक्ये
वेति ॥ यद्यपि धूमरूपलिङ्गार्थज्ञानस्य तच्छब्दस्य धूमज्ञानत्वादिना बोधनेन लक्षणैव तथापि प्रत्येकवाक्ये धूमस्य ज्ञानस्य च तच्छब्देनोपस्थि
तौ व्युत्पत्तिवैचित्र्यादेव कारणस्थल इव नामार्थयोरपि तयोर्भिन्नयोरन्वयादेव धूमज्ञानस्य लाभसंभवान्नो विशिष्टे तच्छब्दस्य लक्षणेत्याशयः ।
नन्वेवं यत्र तस्मादित्येव हेतुः प्रयुज्यते तत्र व्याप्तिः तच्छब्द स्य पञ्चम्यन्तत्वेऽपि लाक्षणिकत्वाभावादत आह ॥ पर्वतो वह्निमानित्यादि ॥ अ
त्र तच्छब्दस्य प्रकारान्तरपरामर्शकत्वात् वह्निपरामर्शो सा व्याप्तिविशेषः स्यादतः साध्यान्तरमाह ॥ वह्निसामग्रीमानिति ॥ संप्रदायविरो
धादिति ॥ हेत्वादेरसाधारण्यपदे नैव कथायामनुल्लेखः अन्यथा अविज्ञातानवधिनिग्रहस्थाने नाप सिद्धान्तानभिधानादिति भावः ॥
पञ्चम्यन्तपदानुल्लेखे पर्वतो वह्निमानित्यादिप्रतिज्ञायामतिव्याप्तिः तत्रापि ज्ञेयवह्नित्वप्रकारेणालाक्षणिकवह्निपदस्य सत्त्वात् ॥ अन्यथा हेत्व

यवार्थ धूमज्ञानजन्यत्वादेर्व्याप्यत्वेन तत्र हेत्वन्वयासंभवादिति प्राच्यो न मतोन्निरस्यति ॥ यत्त्वित्यादिना ॥ ज्ञानलक्षणेति ज्ञानप्रकारे यज्ञो
यवत्त्वादौ लक्षणेत्यर्थः ॥ तेन लक्ष्यतावच्छेदके लक्षणाविरहेपि न क्षतिर्ज्ञापकत्व इति प्राचीनमते न ज्ञाप्यत्व इति नव्यमते न अनयोस्तत्त्वं पुनर्न
दर्शयिष्यते उपपत्ताविति हेत्वर्थान्वयस्येत्यादिः तत्र प्रतिज्ञातं गतं साध्यपदेनाभावादिति जनकत्वाद्बोधार्थं परिचयस्य लक्षणाया आवश्यकत्वे
तत्रैव ज्ञानजनकत्वादिलक्षणोचितत्वादिति भावः ॥ अत एवेति ॥ प्रतिज्ञास्थसाध्यपदे लक्षणाविरहात् आवृत्ताविति अन्यथा बोधितधर्मप्र
कारेण बोधितार्थस्य प्रतिपत्त्यै पुनः पदानुसंधानस्यैवावश्यकत्वाद्बोधितवह्निस्वरूपस्य पर्वतो वह्निमानित्यादिविप्रतिपत्तिस्थवह्निपदस्य
ज्ञेयवह्नित्वप्रकारेण बोधने आवृत्तिवैयर्थ्यप्रसंगादिति भावः ॥ ननु साध्ये भिन्नो निरूढान्यलक्षणाविरहात् चक्षुषोः स्याः कुतो ज्ञापकत्वादौ
लक्षणेत्यत आह ॥ अत एवेति ॥ व्याचक्षते प्रकारान्तरेण तथा च ज्ञापकत्वादावपि परिचयान्निरूढैवेति भावः ॥ यथा स्वीयमिति ॥ द्रव्यादौ
उत्पादकत्वं ज्ञापकत्वमेव हेतुत्वमित्यर्थः ॥ ननु वाक्यार्थनिर्णयदिया ज्ञापकत्वलक्षणाहेतुत्वस्योपदर्शितत्वेनापि प्रकारान्तरव्याख्यानि
र्वाहः ज्ञापकत्वस्य परिचयार्थत्वेनावश्यकत्वमाह ॥ अत एवेति ॥ ज्ञापकत्वस्य परिचयार्थत्वादेवेत्यर्थः ॥ जिज्ञासेति ॥ जिज्ञासावाक्य
मित्यर्थः ॥ तथा च ज्ञापकत्वस्य परिचयार्थत्वाभावे कुतो वह्निमानित्यतः किं निष्टज्ञापकताकवह्निमान् इत्यन्वयबोधो न स्यादिति भावः ॥ न
न्वत्र वह्नेरुत्पादकत्वस्यैव जिज्ञासा न तु ज्ञापकत्वे तथो ... क्रमेण बोधस्यैवानौचित्यादिति ब्रूयात् तदा बाधकमप्याह ॥

धूमादिषु तत्रे चेति ॥ तथाच वह्न्युत्पादकत्वजिज्ञासायां धूमवत्त्वादिषु तत्रेन स्यात् ॥ वह्निस्वरूपे धूमस्यानुत्पादकत्वेन बाधादिय एव स्वयं ज्ञाप
कत्व एव जिज्ञासेति भावः ॥ ननु वह्निज्ञाने प्रश्नविरहेपि कुत इत्युत्तरकालीन जिज्ञासानुरोधादेव तत्र हि वह्निमान्दिषुत्तरवाक्यं शेषवह्नि
त्वप्रकारेण बोधं जनयिष्यतीत्यत आह ॥ नचेति ॥ अर्थात् तत्र व्याप्तेर्नोत्तिति भावः ॥ ननु कुत इत्यनन्तरं ज्ञात इत्यध्याहारात् पञ्चम्या जनक
त्वबोधकतयैव सर्वसामञ्जस्ये तस्या ज्ञापकत्वार्थकत्वे मानाभाव इत्यत आह ॥ न वा कुत इत्यादि ॥ मानाभावादिति ॥ पदान्तरस्य धर्मि
बोध्याहारे कल्पनानपेक्ष्योपस्थितायाः पञ्चम्या एव बोधकत्वलक्षणायाः लघुत्वादिति भावः ॥ इदमनुपलक्षणं ज्ञातपदार्थस्य प्र
तिज्ञाविषयस्य पूर्ववाक्यस्थत्वस्याव [illegible] योगाचेत्यपि बोध्यं ॥ नाम धर्मेण भेदान्वये नाम्नोस्समना नाविभक्तिकत्वस्य तन्त्रत्वादिति ध्ये
यं ॥ ज्ञापकत्वपरिसङ्ख्य ज्ञाप्यत्वे वैति यदुक्तं तत्र सदृष्टान्तमनुवादमाह ॥ दाह इत्यादि ॥ तथाच दाहो दहनाज्जलादिस्थ्य यथाजन्यत्वमे
व पञ्चम्यर्थो न तु जनकत्वं तथा सति जलनिष्ठजनकत्वस्येव दहननिष्ठजनकत्वस्यापि स्वरूपसंबंधावच्छिन्नाभावस्य दाहे सत्वात् दाहे
न दहनादितापि प्रयोगापत्तेः निरूपकतासंबंधस्य वसानिध्यानकतयात् संबंधावच्छिन्नाभावस्य दुर्वचत्वात् तथा जलस्यत्राव रूपान्ते बो
धादिस्यत्रापि ज्ञाप्यत्वमेव पञ्चम्यर्थो न तु ज्ञापकत्वं तथा सति गंधानिष्ठस्येव रूपनिष्ठस्यापि ज्ञापकत्वस्य स्वरूपादिसंबंधेनाभावस्य सत्वे

स्वतो जलं स्पर्शवन्न रूपादित्यपि प्रयोगापत्तेः। निरूपकत्वसंबंधस्य वृत्त्यनियामकतया तत्संबंधावच्छिन्नज्ञापकताभावस्याप्रसिद्ध्या वे
न बोधयितुमशक्यत्वादित्यखंडलार्थः॥ ननु जलं स्पर्शवन्न गंधादित्यत्र तन्मते न जलस्य गंधज्ञाप्यत्वस्याभावो न बोध्यते गंधे ता
पि घटादौ स्पर्शानुमानात् गंधज्ञाप्यस्यैव स्पर्शसत्त्वात्॥ अन्यथा घटः स्पर्शवान्न गंधादित्यपि प्रयोगापत्तेः परं तु पंचम्यर्थे न गं
धज्ञाप्यत्वेनान्वितस्य स्पर्शस्य गंधवन्निरूपितसमवायादिसंसर्गेणैव न तु वादिसाकांक्षया गंधज्ञाप्यत्वादिविशिष्टस्पर्शस्य तादृश
संबंधेन यदधिकरणं तद्भेद एव नञा जलादौ बोध्यते कोपि तत्क्रमेण साकांक्षानुपगमे जलं स्पर्शवद् गंधादित्यादिवाक्यस्यापि प्रामा
ण्यापत्तेः॥ एवं ज्ञापकतायाः पंचम्यर्थत्वमतेपि गंधनिष्ठज्ञापकताकस्पर्शस्य गंधवन्निरूपितसमवायेन यदधिकरणं तद्भेदस्यैव न
ञा जले धर्मिणि बोधसंभवान्नोक्तदूषणं लोपनञः स्वीयानुयोगिताज्ञाप्यत्वस्य पंचम्यर्थत्वे सिध्यति मतमाह॥ नापि शाब्दादिति। तु
त्याच शाब्दादिति पंचम्युपस्थापितस्य शाब्दज्ञानज्ञाप्यत्वस्य शाब्दव्यापकताविशिष्टस्वरूपसंबंधेनैव साध्यसाकांक्षत्वात्॥ स्पर्शस्य
व शाब्दव्यापकतया तादृशसंबंधेन तत्र शाब्दज्ञाप्यत्वस्यासंभवान्न ह शाब्दज्ञाप्यत्वस्य स्पर्शस्य यदधिकरणं तद्भेदो नञा बोधयितुं न
शक्यते किंतु शाब्दव्यापकताविशिष्टस्वरूपसंबंधेन शाब्दज्ञाप्यत्वस्याभावः स्पर्शो धर्मिणि बोध्यते शाब्दव्यापकताविशिष्टनिरूप

कत्वादिसंबंधस्य च स्वनियामकतया तादृशसंबंधेन शाब्दनिष्ठज्ञापकत्वाभावस्य बोधनायोगात्॥ नन्वस्तु रूपसंबंधमात्रेणैव पञ्च
म्यर्थस्य शाब्दज्ञाप्यत्वस्य साध्यसाकांक्षत्वं स्यपर्कत्वानुक्तादिदोषादिवाक्यस्यापि प्रामाण्यापत्तेः व्याप्त्यादिज्ञानवत्त्वात् हेतुवचनादिस्य
र्ज्ञापनादिति भावः॥ ननु शाब्दोपन्यासादिप्रयोगसत्त्वात् द्विभागादिकमिव जन्यत्वमपि पञ्चमी शाक्यसमस्तुन व्यमते जन्यत्वस्या
प्यतिरिक्तत्वेन गौरवात् नवकाकादिमतः तत्रोपपत्तिमाह॥ एवं चेति॥ जन्यतायां पञ्चम्याः प्रयोगसत्त्वेऽप्यर्थः॥ हेतुमत्त्वे जन्यत्वे ज्ञाप्य
वैलक्षण्ये वेति तावतैवानिगमनवारत्वात् पञ्चम्यर्थपदस्य स्वार्थकत्वसंभवादिति भावः॥ ननु प्रकृतसाध्यान्वितस्वार्थबोधकत्वेनप
ञ्चम्या विवक्षणे धूमादालोकवत्पर्वतो वह्निमानिति प्रतिज्ञाया नातिव्याप्तिः संभवतीत्यत आह॥ धूमाद्वह्निमत इति न्यायावाक्या देव
प्रथमतो वह्नेर्धूमज्ञाप्यत्वावगमात् कुतइत्याकांक्षाविरहेण हेत्ववयववाच्यतासंभवान्न तादृशप्रतिज्ञेति वाच्यं। किं ज्ञाप्यो वह्निरित्या
कांक्षाविरहेऽपि धूमज्ञानज्ञाप्यवह्निमत्त्वधर्मपर्वतोऽपि ज्ञाप्यो वह्निरिति संशयव्युत्पन्नस्य हेत्वाकांक्षयैव हेतुप्रयोगात्। अत एव पर्वतो द्रव्यमिति प्र
तिज्ञायां पर्वतो द्रव्यत्वे किं ज्ञाप्यमित्याकांक्षायामपृथिवीत्वादेरेव हेतोरुपन्यासो न तु महानसत्वादेः अन्यथा द्रव्यत्वे किं ज्ञाप्यमित्याकांक्षया
महानसत्वादेरपि हेतुत्वेनोद्भावनापत्तेः तस्यापि महानसद्रव्यत्वज्ञापकत्वात्॥ न चैवं धूमाद्वह्निमत्पर्वतो वह्निमानित्यादिक्रमेण न्यायाः स्या

तवह्निमान्नस्य धूमज्ञाप्यत्वावगमेपि धूमज्ञाप्यवह्निमत्पर्वतत्वावच्छिन्ने किंज्ञाप्यो वह्निरिति साकांक्षायां हेतूद्भावनसंभवादिति वाच्यं ।। त
त्रोद्देश्यतावच्छेदकविधेययोरैक्ये न निराकांक्षत्वादेव तादृशप्रतिज्ञाविरहेण तदुत्थितन्यायासंभवात् ।। नहि ज्ञातवह्निमान्पर्वतो
वह्निमानित्यादिवाक्याद्वह्न्यादिविधेयकः कदाप्यन्वयबोधः ननु प्रकृतपक्षधर्मिकस्वार्थान्वयबोधकपदोपस्थापितयत्साध्यं त
दन्वितस्वार्थबोधकत्वेन पंचम्या विशेषणादेव धूमाद्वह्निमानित्यादिप्रतिज्ञाया अपि संभवतीत्यत आह ।। पर्वत इत्यादि इत्यादौ चेति प्रति
ज्ञायामिसनुपपद्यते तत्रसा निगमने तस्माद्धूमाद्वह्निमानित्याकारके तत्रापि धूमादित्यस्यैवानुक्तपंचम्यंतलाक्षणिकपदस्य
सत्वादिति भावः ।। प्रकृतेति ।। प्रकृतपक्षेति धर्मिकस्वार्थबोधकपदोपस्थापितयत्प्रकृतसाध्यं तद्धर्मिकस्वार्थबोधिकायाः पंचम्यास्तत्प
तल्लाक्षणिकपदपदवयवत्वमित्यर्थः ।। अत्र धूमाद्वह्निमतः सधर्म्मेत्यादिप्रतिज्ञावारणाय धर्मपक्षोपस्थापितत्वे तत्रापि पक्षमात्रस्यैवो
क्तो न तु वर्थस्य बोधितेनैव पक्षे धर्मिणि वह्निपदस्य प्रकृतसाध्यबोधकत्वात्तदोपस्थापितत्वाद्वैयर्थ्यमतः प्रकृतपदं न च प्रकृतप
क्षान्वितस्वार्थबोधकेनातिमत्वह्निपदेनोपस्थापितपदवह्निस्वरूपप्रकृतसाध्यं तत्रैव धूमपदोत्तरपंचम्याः स्वार्थबोधकत्वा
न्नोक्तप्रतिज्ञाव्यवदाम इति वाच्यं । प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधसाकांक्षस्य प्रकृतसाध्यबोधकपदस्य साकांक्षा

यापंचमीतदंतलाक्षणिकपदहेतावप्रसक्तेः ॥ न च समवायेन नीलत्वरूपावच्छिन्नपर्वतसंयोगेन वह्नेः साध्यतास्थले नीलपर्वतो
वह्निमानित्यादिप्रतिज्ञायाः प्रकृतपक्षधर्मिकप्रकृतसाध्यप्रकारकबोधस्याजननात्तत्र स हेतावव्याप्तिः। नीलत्वरूपवतो वह्निमतश्च
तादात्म्ये नैव पर्वतप्रकारीभूतस्यासिद्धेरिति वाच्यं ॥ नव्यमते नीलत्वाभिन्नपर्वततादात्म्येन वह्निमतः साध्यतायामेवोक्ताकारप्रतिज्ञा
स्वीकारात्तन्मते चैतल्लक्षणकत्वादिति भावः। पर्वतो धूमाद्वह्निमानित्यादिप्रतिज्ञाप्रयोगेपि तादृशापयोगेपि स्वरूपितार्थान्वितस्वा
र्थबोधकपंचम्यंतधूमपदत्वात्तद्वारणार्थं प्रकृतसाध्यपदं तथा च तत्र साध्यतावच्छेदकीभूतधूमज्ञाप्यवह्नित्वावच्छिन्ने धूमज्ञा
प्यत्वरूपस्य पंचम्यर्थस्यान्वयाभावात् न प्रसंगः। निरुक्तसाध्यान्वितस्वार्थबोधकलाक्षणिकपदत्वमात्रोक्तौ निगमनातिव्या
प्तिः तस्यापि प्रकृतसाध्यान्वितहेतुत्वलाक्षणिकपंचमीसहितपंचम्यंतपदं। न च निरुक्तसाध्यान्वितस्वार्थबोधकसुब
तलाक्षणिकपदत्वोक्तौ वाधितद्वारणासंभवात् पंचमीपर्यंतानुसरणं व्यर्थमिति वाच्यं। तादात्म्येन न साध्यकस्य घटोनित्यस्साहृद
त्वादित्यादिन्यायस्य निगमने तस्मात्तथा इत्याकारके अतिव्याप्त्यापत्तेः। तस्यापि निरुक्तसाध्यान्वितस्वार्थबोधकपदत्वं अथमेकव
चनांत लाक्षणिकत्वपदत्वात् गुणाभावात्तथेत्युक्तपदस्य गुणिपरत्वे लाक्षणिकत्वात्। निरुक्तपंचम्यंतपदत्वमात्रोक्तौ तत्र

ब्देतादृशमादाय पुनर्निगमनमेतिव्याप्तिस्ततो लाक्षणिके सुखं नचैवमयं देशः क्रियावान्पाकादिस्तत्र ताववद्व्याप्तिः॥ पाकशब्दस्य
शक्तिविरहेण पाकलाक्षणिकत्वाभावात्॥ अन्यत्रकृतस्य शक्तिकायामविधातात्येवपाकप्रतीतेरितिवाच्यं॥ तत्र च पाकशब्दात
ककारस्येवपाकज्ञानेलाक्षणिकत्वात्॥ एकाक्षरकोशतस्तस्यापि नानार्थत्वाभ्युपगमात् वर्णातिरस्यतत्र तात्पर्यग्राहकत्वेनेव सा
फल्यादेवमन्यत्रापीतिभावः॥ अन्यानेकत्वौपगमोक्तं दूषणानिरस्यति॥ यत्विष्यादिनानेनु ज्ञानादिमत्र ज्ञानपदं नवाक्ते त्यर्थे तत
भावावस्यकत्वात्प्यनात्मकत्वात्॥ ज्ञाधातोस्तकारस्य ज्ञानोपस्थापकत्वेपि तस्यानिरूपकत्वस्यैतत्त्वाभावः॥ तथा च ज्ञानपदार्थतावच्छे
शब्दस्य ज्ञानत्वेन लक्षणावश्यकीमत आह॥ इष्टेति॥ तथा चाप्रमाहार्थीयत्वादौ शब्दस्य शक्यत्वे वर्थो विषयकज्ञानोप
स्थापकत्वात्तस्य हेतुत्ववयवो अव्याप्तिनावश्यकीतिभावः॥ यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वावच्छिन्नेन स्य हेतुत्वं ज्ञापकत्वेत्या
दिनानव्यमते कोप्यलपरिग्रहः विना लक्षणामितिधीपदस्यापि ज्ञानत्वेनवाक्यत्वादिति भावः॥ अन्यथेतिवस्तुगाय विषयकज्ञा
नेहेतुत्वमवगतं तत्रैव व्याप्त्यादेरनुपदर्शनीयत्वरसार्थः॥ अत्रेते अयमर्थो ज्ञानादिप्रादौ सुखादेरपीति ज्ञानविषयकज्ञानस्यैव सु
खादिविषयकज्ञानस्याविज्ञानत्वप्रकारेण हेतुत्वादिति भावः॥ कोषादिग्रादि अत्रयाति ज्ञानादवानपाय नियतोत्तत्त्वादिपंचम्यं